N. A.
Lagnachandrika
लग्नचंद्रिका
Sanskrit
Printed on paper
1934 Sambat
Folio: 26
11.8" x 5"
Complete

॥ अथलग्नचंद्रिकाप्रारभ्यते ॥

ल० ॥श्रीगणेशायनमः॥तमिस्त्रयाजगद्ग्रस्तंयोजीवयतिभूतले॥तंवंदेपरमानंदंसर्वसाक्षिणमीश्वरं १ तनुर्धनंचभ्रातासुहृत्पुत्रोरि
चं० पुर्वधूः मृत्युश्च धर्मःकर्मायोव्ययोभावाःप्रकीर्तिताः २ विषमोथसमःपुंस्त्रीक्रूरःसौम्यश्चनामतः चरःस्थिरोद्विस्वभावोमेषाद्याराः
१ शयःक्रमात् ३ दुश्चिक्यंस्यात्तृतीयेचसुखंसद्मचतुर्थके बंधुसंज्ञंचपातालंहिबुकंपंचमेचधीः ४ द्यूनंद्युनमथास्तंचआमित्रंसप्त
मंस्मृतं दशमेत्वंबरंमध्यंछिद्रंस्यादष्टमेगृहे ५ एकादशेभवेल्लाभःसर्वतोभद्रमेवच व्ययेरिष्फंद्वादशेचत्रिकोणंनवपंचमे ६
त्रिषष्ठदशलाभानांभवेदुपचयाख्यकं चतुर्थाष्टमयोःसंज्ञाचतुरस्रंस्मृताबुधैः ७ केंद्रंचतुष्टयंकंटकसंज्ञालंचतुर्थास्तदशमानां ग
परतःपणफरमापोक्लिमंयथाक्रमतः ८ वर्गोत्तमनवांशाश्चरादिषुप्रथममध्यांत्याः होराविषमेर्केंद्वोःसमराशौचंद्रसूर्ययोःक्रमतः
९ स्वगृहात्द्वादशभागाद्रेष्काणाःप्रथमपंचनवमानां मेषाद्याश्चत्वारःसधन्विमकराःक्षपाबलाज्ञेयाः १० तेविनामिथुनंपंचज्ञेयाःपृष्टो
दयाबुधैः मेषोवृषस्तथाकर्कोमकरश्चधनुर्द्धरः ११ पृष्टोदयाःस्मृताःपंचयात्रायांनैवशोभनाः सिंहाद्याश्चचत्वारः कुंभोयुग्मंद्विवा
बलाः १२ शीर्षोदयाश्चमीनस्तुबलीरात्रौतथादिने क्षीणचंद्रोरविर्भौमःपापोराहुःशनिःशिखी १३ बुधोपितैर्युतःपापोहोराराश्यर्द्ध
मुच्यते रवींदुभौमगुरवोज्ञशुक्रशनिराहवः १४ स्वस्मिन्मिनापिचत्वारिपरस्मिन्शानवःस्मृताः मेषेरविर्वृषेचंद्रोमकरेचमहीसुतः १५ ग०
कन्यायांरोहिणीपुत्रोगुरुःकर्केऋषेभृगुः शनिस्तुलायामुच्चश्चमिथुनेसिंहिकासुतः १६ उच्चात्सप्तमगानीचाराशौवापिनवांशके अ १
र्थीभोगीधनीनेताजायतेमंडलाधिपः नृपतिश्चक्रवर्तीचरव्याद्यैरुच्चगैर्ग्रहैः त्रिभिःस्वस्थैर्भवेन्मंत्रीत्रिभिरुच्चैर्नराधिपः १८ त्रिभिर्नीचैर्भ
वेद्दासस्त्रिभिरस्तंगतेर्जडः उदितःस्वगृहस्थश्चमित्रगेहेस्थितोपिवा १९ मित्रवर्गेमित्रदृष्टःसग्रहःसबलःस्मृतः स्वामिनाबलिनादृष्टः

सबलैश्च शुभग्रहैः २० नदृष्टो न युतः पापैः स्वभावः सबलः स्मृतः दशमे बुधसूर्यौ च भौमराहू च षष्ठगौ २१ राजयोगे च यो जातः स पुमान्नाय
को भवेत् आद्ये जीवः शनिश्चांते ग्रहा मध्ये निरंतरं २२ राजयोगं विजानीयात् कुटुंबबलसंयुतः सहजस्थो यदा जीवो मृत्युस्थाने स्थितः सि
तः २३ निरंतरं ग्रहा मध्ये राजा भवति निश्चितं जीवो वृषे सुधारश्मिर्मिथुने मकरे कुजः २४ सिंहे भवति सौरिश्च कन्यायां बुधभास्करौ तु
लायामसुराचार्यो राजयोगो भवेदयं २५ अस्मिन्योगे समुत्पन्नो महाराजो भवेन्नरः अष्टमे द्वादशे वर्षे यदि जीवति मानवः २६ सार्वभौम
स्तदा राजा जायते विश्वपालकः एकोऽपि जीवो यदा लग्ने सर्वे योगास्तदा शुभाः २७ दीर्घजीवी महामान्यो जायते नायको भटे धनुष्यास्य मु
क्तश्च मीने जीवस्तुले बुधः २८ नीचस्थौ शनिचंद्रौ च राजा स्याद्रिपुवर्जितः दाता भोक्ता च विख्यातो मान्यो मंडलनायकः २९ मीने शुक्रो
बुधश्चांते १२ धने २ राहुस्तनौ १ रविः सहजे ३ च भवेद्भौमो योगे राजा न जायते ३० सहजे च यदा जीवो लाभस्थाने च चंद्रमाः स राजा रा
ज्यमध्यस्थो विख्यातः कुलदीपकः ३१ शुभग्रहाः शुभस्थे त्रे भवंति यदि केंद्रगाः तदा शुभानि कर्माणि करोत्येव हि बालकः ३२ उच्चस्था
नगताः सौम्याः केंद्रेषु च भवंति चेत् ध्रुवं राज्यं भवेत्तस्य स्ववंश्यानां च पोषकः ३३ धने व्यये तथा लग्ने सप्तमे च यदा ग्रहाः छत्रयोगस्तदा
त्ते यो वंश्यानां नायको भवेत् ३४ ससौरा वा सचंद्रा वा यत्र कुत्र चतुर्ग्रहाः मालानामा प्रदो योगो राज्यदो धनदो भवेत् ३५ स्वक्षेत्रस्थो यदा
जीवो बुधः सौरिः स्वराशिगः अत्र जातस्य दीर्घायुः संपदश्च भवंति हि ३६ मीने बृहस्पतिः शुक्रश्चंद्रमाश्च यदा भवेत् तत्र जातस्य राज्यं
स्यात्पत्नी च बहुपुत्रिणी ३७ पंचमस्थो यदा जीवो दशमस्थश्च चंद्रमाः राज्यवान्स महाबुद्धिस्तपस्वी च जितेंद्रियः ३८ सिंहे जीवस्तु
लाकीटकौ दंडमकरेषु च ग्रहा यदा तदा जातो देशभोगी भवेन्नरः ३९ तुलाकोदंडमीनस्थो लग्नगः स्याच्छनैश्चरः करोति नृपते जन्म

लू॰ त्वन्यराशौगतायुषः ४० विद्यास्थानेयदासौम्यःकर्मस्थानेचचंद्रमाः धर्मस्थानेयदासौम्यायोगेराजान्नजायते ४१ मकरेकार्मुकेमीनेवृषे
चं॰ चमिथुनेस्त्रिये ग्रहास्तदानविख्यातोराजाभवतिमानवः ४२ बुधभार्गवजीवार्कियुक्तोराहुश्चतुष्टये करोतिधनमारोग्यंपुत्रंमानादिकं
२ गृहं ४३ चतुर्थेभवनेशुक्रोगुरुश्चंद्रोधरासुतः रविसौरिसुताःसंतिराजाजातोभवेद्ध्रुवं ४४ अष्टमेचव्ययेक्रूरोमध्यगोक्रूरसौम्यको
राजयोगेनयोजातः चत्वारिंशत्सजीवति ४५ लग्नेसौरिस्तथाचंद्रस्त्रिकोणेजीवभास्करौ कर्मस्थानेभवेद्भौमोयोगेराजान्नजायते ४६
नवमेचयदासूर्यःस्वगृहस्थोभवेद्यदा तस्यजीवतिनभ्रातास्यादेकोपिनृपैःसमः ४७ द्वित्रितुर्यसुतेषष्ठेकर्मण्यपियदाग्रहाः राजयो
गंविजानीयाज्जातस्तन्नृपोभवेत् ४८ लग्नेक्रूरेव्ययेक्रूरोधनेसौम्योयदाभवेत् सप्तमेभवनेक्रूरःपरिवारक्षयंकरः ४९ लग्नेक्रू
रोव्ययेसौम्योधनेक्रूरश्चजायते राजयोगेनयोजातोदरिद्रोधनवर्जितः ५० चापेसौरिश्चचंद्रश्चमेषेजीवोयदाभवेत् दशमेराहुशु
क्रोचराजयोगोनृपोभवेत् ५१ सिंहेजीवोथकन्यायांभार्गवोमिथुनेशनिः स्वक्षेत्रेहिबुकेभौमःसप्तमान्नायकोभवेत् ५२ शनिचं
द्रौचकन्यायांसिंहेजीवोघटेतमः मकरेचकुजस्तत्रजातोविश्वस्यपालकः ५३ शुक्रोजीवोरविर्भौमश्चापेमकरकुंभयोः मीनेच
वत्सरेविंशेजातःस्यात्सर्वकर्मकृत् ५४ चतुर्षुकेंद्रस्थानेषुसौम्यपापग्रहस्थितिः चतुःसागरयोगोयंराज्यदोधनदोभवेत् ५५ क रा॰
र्कलग्नेजीवयुक्तेलाभेचंद्रज्ञभार्गवाः मेषेभानौचयोजातःसराजाविश्वपालकः ५६ कर्मस्थानेयदाजीवोबुधःशुक्रस्तथाशशी॥ २
सर्वकर्माणिसिध्यंतिराजमान्योभवेन्नरः ५७ षष्ठेष्टमेपंचमेचनवमेद्वादशेतथा सौम्यक्रूरग्रहैर्योगेराजमान्यःसकष्टकः ५८ पंचमे
चयदाषष्ठेचाष्टमेनवमेक्रमात् भौमराहुसितार्काःसुजातोनकुलदीपकः ५९ लग्नेसौरिस्तथाचंद्रश्चाष्टमेभार्गवोयदा जायतेचत

द्राराजामानीपत्नीरतःसदा ६० मिथुनस्थोयदाराहुःसिंहस्थोभूमिनंदनः अत्रजातःपितुर्द्रव्यंप्राप्नोतिसकलंनृपः ६१ चापार्द्धेशनि
नायुक्तोपदिसूर्यःप्रजायते लग्नेचसबलोमंदोमकरेचकुजोभवेत् ६२ अत्रयोगेसमुत्पन्नोमहाराजोभवेन्नरः दूरादेवनमंत्य
स्यप्रतापेश्वरणंनृपाः ६३ उच्चाभिलाषीसवितात्रिकोणस्थोयदाभवेत् अपिनीचकुलेजातोराजास्याद्धनपूरितः ६४ एकादशे
यदासर्वेग्रहाःस्युर्दशमेपिवा विलग्नेसन्मुखेवापिकारकाःपरिकीर्तिताः ६५ उत्पन्नःकारकेयोगेनीचोपिनृपतांव्रजेत् राजवं
शसमुत्पन्नोराजातत्रनसंशयः ६६ लग्नतश्चान्यतोवापिक्रमेणपतिताग्रहाः एकावलीसमाख्यातामहाराजोभवेन्नरः ६७ धन।
स्थानेयदाशुक्रोदशमेचबृहस्पतिः षष्ठेष्टमेसिंहिकेयोराजाभवतिविक्रमात् ६८ चतुर्ग्रहाएकगताःपापाःसौम्याभवंतिचेत्॥
भ्रातृधीधर्मलग्नार्थे ३।५।९।१।२ राजयोगोभवेदयं ६९ त्रिकोणेसप्तमेलग्नेभवंतिचयदाग्रहाः हंसयोगंविजानीयात्स्ववंश
स्यानपालकः ७० सर्वग्रहैर्यदाचंद्रोविनालिंचनिरीक्षितः षष्ठेष्टमेचयामित्रेसदीर्घायुर्धराधिपः ७१ षष्ठेष्टमेद्वादशेचहिती
येचयदाग्रहाः सिंहासनाख्ययोगेस्मिन्राजासिंहासनेवसेत् ७२ लग्नेशुक्रबुधौनस्तोनास्तिकेंद्रेबृहस्पतिः दशमेंगारको
नास्तिसजातःकिंकरिष्यति ७३ अष्टमस्थायदाक्रूराःसौम्यालग्नेस्थिताग्रहाः ध्वजयोगेत्रयोजातःसपुमान्नायकोभवेत् ॥
७४ षष्ठस्थानेयदापापाःकेंद्रस्थानेशुभग्रहाः सर्वसिद्धिर्भवेत्तस्यराजमान्योभवेन्नरः ७५ मेषलग्नेयदाभानुश्चतुर्थेचबृहस्प।
तिः दशमेचकुजोजातोविश्वस्याधिपतिर्भवेत् ७६ लग्नेसौरिस्तथाचंद्रस्त्रिकोणेजीवभास्करौ कर्मस्थानेभवेद्भौमोराजयो।
गोभिधीयते ७७ केंद्रस्वोच्चस्थितेसौम्येराज्यलक्ष्मीपतिर्भवेत् केंद्रेपापेस्वोच्चसंस्थेराजास्याद्दुःखितेग्रहे ७८ बलीसौम्यग्रहेल

ल० ग्रकेन्द्रस्थोयदिवीक्षते तदानिहंत्यनिःशनितमःसूर्योदयोयथा ७९ वंध्यानारीपुमान्वंध्योमत्स्योस्वभर्तुभानुजो मत्युस्थाःस्युर्यदापाप
चं० मृत्युंदातुं गतास्तदा ८० अग्रेजातंरविर्हन्यात्पृष्ठेजातंशनैश्चरः जातंजातंकुजोहन्यान्नाहनाम्यसुंयाचरेत् ८१ चतुःकेंद्रग्रताःसौ
३ म्याःपापाद्वादशषष्ठगाः भवेत्सराजाविख्यातोलब्धछत्रोविभूषितः ८२ लग्नात्तुपंचमस्थानेयदासूर्यबृहस्पती तदाविद्याधनैः
पूर्णोजायतेजातकोत्तमः ८३ एकोपियदिकेंद्रस्थोबुधोजीवोवलीभृगुः जायतेत्रतदावालोधनाढ्योवेदपारगः ८४ द्वित्रिसौ
म्याःस्वगानीचाव्ययभावेथवापुनः भवंतिधनिनःषष्ठेनिधनांतेचभिक्षुकाः ८५ नीचस्थितोजन्मनियोग्रहःस्यात्तद्राशिनाथोय
तदुच्चनाथः भवेत्रिकोणेयदिकेंद्रवर्तीराजाभवेद्धार्मिकचक्रवर्ती ८६ षष्ठेक्रूरेनरोजातःशत्रुपक्षविमर्दकः षष्ठेसौम्येसदारो
गीषष्ठेचंद्रस्तमृत्युदः ८७ लग्नात्तृतीयभवनेयदिचंद्रसुतोभवेत् द्वौपुत्रौकन्यकास्तिस्रोजायंतेनात्रसंशयः ८८ लग्नात्तृतीय
भवनेवलीवाचस्पतिर्यदा पंचपुत्रास्तदातस्यजायंतेमानवस्यवै ८९ लग्नात्तृतीयभवनेशनिचंद्रौयदास्थितौ श्यामवर्णस्तदा
वालोभ्रातृहीनश्चजायते ९० लग्नात्तृतीयभवनेबलीशुक्रोयदाभवेत् कन्याद्वयंत्रयःपुत्राजायंतेतस्यनिश्चितम् ९१ लग्नात्तृती
यभवनेराहुयुक्तोयदाशशी भ्रातृहीनोभवेद्वालोलक्ष्मीवानपिजायते ९२ लग्नात्तृतीयभवनेपंचमेवाधरासुतः म्रियतेपुत्रदु ग०
खेननारीवापुरुषोपिवा ९३ लग्नात्सप्तमगेहस्थोवलीशुक्रोयदाभवेत् कन्याद्वयंचयःपुत्राधनवंतोभवंतिहि ९४ सिंहलग्ने ३
यदाशुक्रोशनिर्वापिव्ययस्थित ः तत्रजातस्यवालस्यनेत्रनाशःप्रजायते ९५ सूर्योष्टमेरिपौचंद्रोधनेभौमोव्ययेशनिः ग्रहदो
षेणनेत्राणामंधतांजनयंत्यमी ९६ शुभवर्गोत्तमेजन्मवेशिस्थानेचसद्ग्रहे अशून्येषुचकेंद्रेषुकारकाख्यग्रहेषुच ९७ सूर्यकें

द्रेराजसेवीवैश्यवृत्तिर्निशाकरे॥ प्रास्ववृत्तिः कुजेशूरोबुधेचाध्यापकोभवेत् ९८ स्नानुष्ठानरतोनित्यंदिव्यबुद्धिर्नरोगुरौ भृगौविद्यार्थसंपन्नो
नीचसेवीशनैश्चरे ९९ ॥इतिराजयोगाः॥ केंद्रेचसौम्यायदिपृष्ठभाजः पापाः कलत्रेचमनुष्यराशौ राज्ञीभवेत्स्त्रीवहुकोशयुक्तानित्यं
प्रशांताचसुपुत्रिणीच १०० बुधेविलग्नेयदितुंगसंस्थेलाभस्थितोदेवपुरोहितश्च नरेंद्रपत्नीवनिताप्रसंगेतदाप्रसिद्धाभवतीहभू
मौ १ एकोपिजीवोरसवर्गदेशुद्धः केंद्रेयदाचंद्रनिरीक्षितश्च राज्ञीभवेत्स्त्रीसधनासपुत्रारूपान्वितापूर्णनितंवविंवा २ कर्कोदये
सप्तमगेपतंगेजीवेनदृष्टेपरिपूर्णदेहा विद्याधरीचात्रभवेत्प्रधानाराज्ञीगतारिर्वहुपुत्रपौत्रा ३ षड्वर्गशुद्धेस्त्रिभिरेवराज्ञीचतु
र्भिरंशैश्चतथैवपत्नी पंचादिभिर्दिव्यविमानभाजात्रैलोक्यनाथप्रमदातदास्यात् ४ लाभस्थितःशीतकरोभृगुश्चकलत्रगःसो
मसुतेनयुक्तः जीवेनदृष्टाभवतीहराज्ञीख्याताधरायांसकलैःस्तुताच ५ स्त्रीपुंसयोःफलंतुल्यंजातकेकिंतुसप्तमे सौभाग्यंचं
द्रलग्नाभ्यामष्टमाद्भर्तृनाशनम् ६ ॥इतिस्त्रीराजयोगाः॥ कर्मस्थानेनिजक्षेत्रेभौमःशुक्रबुधैर्युतः यदिराहुर्भवेत्तस्यसर्पेणहि:स्
नोक्षयः ७ होरायाद्वादशेराशौस्थितोयदिदिवाकरः करोतिदक्षिणेकाणंवामनेत्रेचचंद्रमाः ८ भौमक्षेत्रेयदाजीवोजीवक्षेत्रे
चभूसुतः द्वादशेवत्सरेमृत्युर्वालकस्यनसंशयः ९ धनस्थानेयदाभौमःशनैश्चरसमन्वितः सहजेचभवेद्राहुर्भ्रातातस्यनजीव
ति १० चतुर्थेचयदाराहुःषष्ठेचंद्रोष्टमेपिवा सद्यएवभवेन्मृत्युःशंकरोयदिरक्षिता ११ अष्टमस्थोनिशानाथःकेंद्रेपापेनसंयु
तः॥ चतुर्थेचयदाराहुर्वर्षमेकंसजीवति १२ पातालेचांवरेपापोद्वादशेचयदास्थितः पितरंमातरंहंतिदेशाद्देशांतरंव्रजेत् १३
पंचमस्थोनिशानाथस्त्रिकोणेचवृहस्पतिः दशमेचमहीसूनुःपरमायुःसजीवति १४ धनस्थानेयदाशुक्रःक्रूरग्रहसमन्वितः॥

ल० नपश्यतिनिजक्षेत्रमल्पपुनस्तदाभवेत् १५ धनस्थानेयदाक्रूरःसहजेसप्तमेतथा पंचमेभवनेजीवोनीचजातस्तदाभवेत् १६ नवमेपंच
पं० मस्थानेचतुर्थेचयदाग्रहाः आदौजातस्त्वनष्टःस्यात्पश्चाज्जातःसजीवति १७ विवाहितायामन्यस्यामेकःपुत्रोभवेत्तदा विख्यातोभु
४ वनेत्यागीसदीर्घायुर्महामतिः १८ लग्नेधनेव्ययेक्रूरोयदाम्लेच्छोचजायते विष्टयामोगवंधोस्यद्वादशाष्टमवासरे १९ षष्ठेचभव
नेभौमःसप्तमेसिंहिकासुतः अष्टमेचयदासौरिर्भार्यातस्यनजीवति २० तिथिप्रांत्येदिनांतेचलग्नस्यांतेचभांतके चरांशेचय
दाजातःसोन्यजातःशिशुर्भवेत् २१ स्वक्षेत्रस्थोयदाभौमःकर्मस्थानंनिरीक्षते बुधभार्गवसंयुक्तःस्वल्पकर्मफलप्रदः २२ रिपु
स्थानेयदाचंद्रोलग्नस्थानेशनैश्चरः कुजश्चसप्तमस्थानेपितातस्यनजीवति २३ एकादशेयदाक्रूरःपंचमेचंद्रभार्गवौ प्रथमंकन्य
काजन्ममातातस्यसकष्टका २४ सहजस्थोयदाराहुर्धनस्थानेबृहस्पतिः बुधेनचसमायुक्तस्तस्यबंधुत्रयंभवेत् २५ चापेसूर्यः
शनिःकुंभेमेषेभवतिचंद्रमाः मकरेचयदाशुक्रोभुंक्तेनैवपितुर्धनं २६ क्रूराश्चतुर्षुकेंद्रेषुतथाक्रूरोधनेपिवा दारिद्र्ययोगंजानीया
त्तद्वंशस्यक्षयंकरः २७ लग्नस्थानेयदाजीवोधनस्थानेशनैश्चरः राहुश्चसहजस्थानेमातातस्यनजीवति २८ सप्तमेभवनेभौमश्चा
ष्टमेभार्गवोयदा नवमेभवनेसूर्यःस्वल्पायुस्तस्यजायते २९ राहुजीवौरिपुक्षेत्रेलग्नेवाथचतुर्थगौ त्रयोविंशेतदावर्षेपुनस्तातंवि रा०
नाशयेत् ३० बालस्यजन्मकालेचेदष्टमस्थःशनैश्चरः बालकश्चभवेत्कुष्ठीमासेमृत्युर्नसंशयः ३१ क्रूरैर्दृष्टोजन्मलग्नात्षष्ठेवाचाष्ट ४
मेबुधः चतुर्थाब्देभवेन्मृत्युःशंकरोयदिरक्षति ३२ अष्टमस्थोयदाभौमस्त्रिकोणेनीचगोरविः सशीघ्रमेवजातःस्याद्विस्माजीवीचदुः
खितः ३३ सिंहेभौमस्तुलेसौरिःकन्यायांचयदासितः मिथुनेचयदाराहुर्जननीतस्यनश्यति ३४ लग्नेक्रूरःस्वभवनेक्रूरःपातालगो

यदा दशमेभवनेक्रूरःकष्टंजीवतिबालकः ३५ अष्टमेचनिशानाथःकेंद्रेक्रूरोयदाभवेत् चतुर्थेचयदाराहुर्वर्षमेकंसजीवति ३६ शु
भग्रहावलोकैश्चयदिजीवतिजातकः सचदुष्टस्वभावःस्यात्क्रूरकर्मकरोपिच ३७ लग्नेचंद्रोधनेशुक्रोव्ययेचबुधभास्करौ राहुश्चपंच
मेबालःसभवेद्बधबंधकृत् ३८ सप्तमेभवनेभानुर्मेषस्थोभूमिनंदनः राहुश्चांसेचतस्यैवपिताकष्टेनजीवति ३९ स्मरेव्ययेचसह
जेमध्ये१०क्रूरायदाग्रहाः तदाजातस्यबालस्यशरीरेकष्टमादिशेत् ४० कन्यायांचयदाराहुःशुक्रोभौमःशनिस्तथा जायतेतत्रजा
तस्यकुबेरादधिकंधनं ४१ धनेराहुर्बुधःशुक्रःसौरिःसूर्योयदास्थिताः तस्यमातुर्भवेन्मृत्युर्मृतेपितरिजायते ४२ रविराहूसौरि
सौम्यजीवालग्नेथपंचमे अन्नयोगेचयोजातोजातमात्रंसनश्यति ४३ जीवार्कराहुभौमाश्चचत्वारःक्रूरवर्गगाः सप्तमेचगृहेशुक्रो
देहेकष्टंसदाभवेत् ४४ क्रूरलग्नेयदाजात स्तत्ता मीनूरसंयुतः आमवातोभवेत्तस्यशरीरेकष्टमादिशेत् ४५ गुह्यस्थानेयदाभौ
मोराहुःसौरिसमन्वितः नृपपीडाभवेत्तस्यस्वासनेनैवतिष्ठति ४६ सहजेसहजाधीशोलग्नेपुत्रेधनेपिवा जायतेनतदाबालोयदि
जातोनजीवति ४७ कन्यायांमिथुनेराहुःकेंद्रेषष्टेव्ययेभवेत् त्रिकोणेवायदाजातोदाताभोक्तानिरामयः ४८ चतुर्थेराहुशौरार्को
षष्टेचंद्रोबुधःकुजः भार्गवश्चात्रयोजातःसगृहस्यक्षयंकरः ४९ एकःपापोष्टमस्थानेशत्रुक्षेत्रेयदाभवेत् पापेनवीक्षितोवर्षा
न्मारयत्येवबालकं ५० भौमभास्करमंदाश्चशत्रुक्षेत्रेष्टमेयदा यमेनवीक्षितोप्येवंवर्षमात्रंनजीवति ५१ वक्रीशनिर्भौमगेहे
केंद्रेषष्टेष्टमेपिवा कुजेनबलिनादृष्टोहंतिवर्षद्वयेशिशुं ५२ राहोर्द्वयेत्रिभिर्दृष्टेकेतुदृष्टेचतुष्टये दृष्टेचगुरुशुक्राभ्यांदीर्घकाले
सजीवति ५३ चंद्रमंगलसंयोगोजन्मकालेयदाभवेत् तस्यजातस्यगेहंतुलक्ष्मीर्नैवविमुंचति ५४ मारयतिषोडशाहात्प्रश्ने

ल० स्थरःपापवीक्षितःकेंद्रे षड्भिर्मासैर्भौमोवर्षाद्दारविस्तुलग्नाच्च ५५ षष्टाष्टमगतश्चंद्रःसद्योमरणायपापसंदृष्टः अष्टाभिःशुभसंदृष्टोव
चं० र्षैर्मिश्रैस्तदर्द्धेन ५६ शुक्लपक्षेनिशायांचकृष्णेजातोदिवायदा षष्टाष्टमगतश्चंद्रोनाशिशुंहंतिमातृवत् ५७ शनिराहुकुजैर्युक्तः
५ सप्तमेनवमेशशी सप्तमेदिवसेहंतिमासेवासप्तमेशिशुं ५८ पुत्रेकलत्रेलग्नेचव्ययेपापयुतःशशी शिशुंहंतिनदृष्टश्चेद्बलवद्भिःशु
भग्रहैः ५९ चंद्रःपापसमायुक्तश्चंद्रोवापापमध्यगः चंद्रात्सप्तमगःपापस्तदामातृवधोभवेत् ६० लग्नस्यश्चयदाभानुःपंचम
स्थोनिशाकरः अष्टमस्थायदापापास्तदाजातोनजीवति ६१ लग्नंपापेनसंयुक्तंलग्नंवापापमध्यगं लग्नात्सप्तमगाःपापास्त
दाचात्मवधोभवेत् ६२ सूर्यःपापेनसंयुक्तःसूर्योवापापमध्यगः सूर्यात्सप्तमगःपापस्तदापितृवधोभवेत् ६३ क्रूरक्षेत्रेयदाजा
तोलग्नेशोस्तंगतोभवेत् अपकर्मातदाजातःसप्तवर्षाणिजीवति ६४ अष्टमेचयदासौरिर्जन्मस्थानेचचंद्रमाः मंदाग्निरुदररोगीचगा
त्रहीनश्चजायते ६५ शनिक्षेत्रेयदाभानुर्भानुक्षेत्रेयदाशनिः द्वादशेवत्सरेमृत्युस्तस्यजातस्यजायते ६६ बुधभौमौयदालग्न
षष्टस्थानेचतिष्ठतः तस्करोघोरकर्माचहस्तपादौविनश्यतः ६७ षष्टेष्टमेचमूर्तौचशत्रुक्षेत्रेयदाबुधः चतुर्वर्षेभवेन्मृत्युर्बाल
कस्यनसंशयः ६८ अष्टमस्थोयदाराहुःकेंद्रस्थानेचचंद्रमाः सद्यएवभवेन्मृत्युर्बालकस्यनसंशयः ६९ सप्तमेनवमेराहुःशत्रु ए०
क्षेत्रेयदाभवेत् प्राप्तेचषोडशेवर्षेतस्यमृत्युर्नसंशयः ७० द्वादशस्थोयदाचंद्रःपापस्यादष्टमेगृहे एकमासेभवेन्मृत्युर्बालका ५
स्यचनिश्चितं ७१ जन्मस्थानेयदाराहुःषष्टस्थानेचचंद्रमाः अपस्मारीतदाबालोजायतेनात्रसंशयः ७२ भार्गवेणयुतश्चंद्रःष
ष्टाष्टमगतोयदा मंदाग्निरुदररोगीचहीनांगोपिप्रजायते ७३ लग्नेव्ययेचपातालेयामित्रेचाष्टमेकुजे॥ स्त्रियोहरतिभर्त्तांचपतिंभा

यो विनाशयेत् ७४ षष्ठेष्टमे यदा चंद्रो बुधयुक्तस्तु तिष्ठति विषदोषेण बालस्य तदा मृत्युश्च जायते ७५ भानुना संयुतश्चंद्रः षष्ठाष्टमगतो
यदा राजदोषेण मृत्युर्वा सिंहदोषेण वा भवेत् ७६ एकोपि यदि मूर्तौ स्याज्जन्मकाले दिवाकरः स्थानहीनो भवेद्बालः शोकसंतापपी
डितः ७७ दशमस्थो यदा भौमः शत्रुक्षेत्रस्थितो भवेत् म्रियते तस्य बालस्य पिता शीघ्रं न संशयः ७८ लग्नेष्टमे यदा राहुश्चंद्रोपि यदि दृ
श्यते दशाहे जायते तस्य बालस्य मरणं ध्रुवम् ७९ लग्ने जीवो धने मंदो रविभौमबुधास्तथा विवाहसमये तस्य म्रियते निश्चितं पिता ८०
शनैश्चरस्तुलाकुंभमकरेषु यदि जायते लग्ने षष्ठे तृतीये च तदारिष्टं न जायते ८१ मीनलग्ने जीवशुक्रौ मेषे सौम्यो मकरे कुजः दासवंशेपि
जातो सौ राजा छत्रधरो भवेत् ८२ लग्नाच्च नवमे सूर्ये सूर्यपुत्रे तथाष्टमे एकादशे भार्गवे च मासमेकं न जीवति ८३ धने गुरुः सैंहिके
यो भौमः शुक्रश्च सप्तमे अष्टमे रविचंद्रौ च म्लेच्छः स्याद्यौवने हि सः ८४ नवमे दशमे चंद्रः सप्तमे च यदा सितः पापे पातालसंस्थे च वं
शच्छेदकरो नरः ८५ भ्रातृस्थाने यदा जीवो लाभस्थाने यदा शशी स लोके गृहमध्यस्थो जायते कुलदीपकः ८६ सिंहलग्ने यदा भौमः
पंचमे च निशाकरः व्ययस्थाने यदा राहुः संजातः कुलदीपकः ८७ एकः पापो यदा लग्ने पापश्चैको रसातले जायते हि सुखी बालः स
जातः कुलदीपकः ८८ लग्ने वा सप्तमे भौमः पंचमे च दिवाकरः जीवेदरण्यमध्येपि विख्यातः स न संशयः ८९ भौमक्षेत्रे यदा जातो
मूर्तौ क्रूरग्रहो भवेत् वर्षमध्ये भवेन्मृत्युर्बालकस्य न संशयः ९० क्षीणचंद्रो द्वादशस्थो दुःखदः पापवीक्षितः करोति विपुलं क्लेशमष्ट
मस्थो यदा शनिः ९१ द्वादशे च यदा चंद्रः षष्ठे पापग्रहो भवेत् अल्पायुश्च सदा रोगी जायते जातको ध्रुवं ९२ दशमे भवने राहुः पितृमा
त्रोः प्रपीडकः द्वादशे वत्सरे तस्य बालस्य मरणं ध्रुवं ९३ शनिक्षेत्रे यदा भानुर्भानुक्षेत्रे शनैश्चरः विंशतो २० वत्सरे मृत्युर्बालकस्य न सं

लं० प्राय: ९४ रिपुस्थानेयदापापोव्ययस्थानेचचंद्रमाः चतुर्थेमंगलोयस्यमातातस्यनजीवति ९५ चतुर्थेमातृहापापोदशमेपितृहाभवेत् ॥
चं० सप्तमेभवनेपापेपितृमात्रोर्विनाशकः ९६ द्वादशेरिपुभावेवायदाक्रूराव्यवस्थिताः तदामातृभयंविंद्याच्चतुर्थेदशमेपितुः ९७ उच्चोवाय
६ द्विवानीचःसप्तमस्थोयदारविः तदाजातोनिहंत्याशुमातरंनात्रसंशयः ९८ नाग८गो९सिंह२४जाती२२पुष्पस्मा११छिपनेत्र२न
खा२० धृतिः१८ स्माब्धि२१दिक्१०द्जासंशैस्तुल्यादैस्त्वनिधोव्यसुः ९९ लग्नेशनिर्यदाभौमोराहुःसूर्यस्थसंस्थितः संतापोरक्त
दोषोयस्सर्वसौम्येष्वरोगिता २०१ केन्द्रेशुभोयदैकोपिवलीविम्बप्रकाशकः सर्वेदोषाःक्षयंयांतिदीर्घायुश्चभवेन्नरः १अर्कःकें
द्रेयदासंक्रोभिन्नांशेगुरुवीक्षितः वित्तवान्ज्ञानसंपन्नोजायतेहितदानरः २॥इतिशुभाऽशुभयोगाः॥ विपदःप्रथमेमासेद्वात्रिंशे
चत्रयोदशे षष्टेपिचयदासूर्योजातोजीवतिषष्टिकं ३ एकादशेष्टमेमासेचंद्रेपीडाचषोडशे सप्तविंशतिमेवर्षेचतुर्युक्ता८४मि
तोमृतिः ४ द्वात्रिंशेचद्वितीयेचवर्षेपीडाचमंगले चतुःसप्ततिवर्षाणिसदारोगीसजीवति ५ बुधवारेष्टमेमासेपीडावर्षेतथाष्टमे॥
पूर्णेचतुःषष्टिवर्षेततोमृत्युर्भविष्यति ६ गुरौचसप्तमेमासेषोडशेचत्रयोदशे पीडाततश्चतुर्युक्तशतवर्षाणिजीवति ७ शुक्रवारेच
जातस्यदेहोरोगविवर्जितः षष्टिवर्षेचसंपूर्णेम्रियतेमानवोध्रुवम् ८ शनौचप्रथमेमासेपीडाष्टादशवत्सरे हृष्टदेहस्तदाजातःश रा०
तंवर्षाणिजीवति ९॥इतिवारायुः॥ मिष्टान्नभोगीमानीचक्रोधीचरतिलालसः पित्ताधिकोरवेर्वारेधनकामीभवेन्नरः १० भोगी ६
कामीशास्त्रवेत्तागुणीमानीजितेंद्रियः विद्याधिकःशीलयुक्तोजायतेचंद्रवासरे ११ मूर्खःप्रियोधनीक्रूरःश्रुतिस्मृतिविनिंदकः
नास्तिकोवेदहीनश्चभौमेभोगीभवेन्नरः १२ वेदशास्त्रक्रियायुक्तोदयालुश्चबहुश्रुतः भयानकोयोगयुक्तोजायतेबुधवासरे १३

वेदवेत्ताचाग्निहोत्रीपुत्रपौत्रधनान्वितः प्रजान्वितःपूर्णवेत्तागुरुवारेभवेन्नरः १४ अर्थीभोगीधनीस्वस्थःकृपालुर्बहुसेवकः देव
ज्ञोपिश्रुतिज्ञश्चजनःशुक्रदिनेभवेत् १५ नीचसक्तःकृतघ्नश्चकुटिलोबंधुपीडकः कृतकार्यहरोरोगीजायतेशनिवासरे १६ ल
ग्नादुपचयस्थानस्थितेवारग्रहेसति उक्तंफलंभवेच्छ्रेष्ठं विपरीतमतोन्यथा १७ इतिजन्मवारफलं ॥ अथमेषादिराशिस्थचंद्र
फलं ॥ लोलनेत्रःसदारोगीधर्मार्थकृतनिश्चयः पृथुजंघःकृतज्ञश्चविक्रांतोराजपूजितः १८ कामिनीहृदयानंदोदाताभीतोजलाद
पि चंडकर्मामृदुश्चांतेमेषराशौभवेन्नरः १९ भोगीदाताशुचिर्दक्षोमहामहत्वोमहाबलः धनीविलासीतेजस्वीसुमित्रश्चवृषेभवेत् ॥
२० मिष्टवाक्योलोलदृष्टिर्दयालुर्मैथुनप्रियः गांधर्ववित्कंठरोगीकीर्तिभागीधनीगुणी २१ गौरोदीर्घःपटुर्वक्तामेधावीचदृढव्रतः स
मर्थोत्युतिवादीचजायतेमिथुनेनरः २२ कार्यकारीधनीशूरोधर्मिष्ठोगुरुवत्सलः शिरोरोगीमहाबुद्धिःकृशांगःकृतवित्तमः २३ प्र
वासशीलकोपांधोवारिपेदुःखीसुमित्रकः अनासक्तोगृहेवक्ताकर्कराशौभवेन्नरः २४ क्षमायुक्तस्तथासुक्तोमद्यमांसप्रियःसदा देश
भ्रमणशीलश्चशीतभीतःसुमित्रकः २४ विनयीशीघ्रकोपश्चजननीजनवल्लभः व्यसनीप्रकटोलोकेसिंहराशौभवेन्नरः २५ वि
लासीसुजनाह्लादीसुभगोधनपूरितः प्रवासशीलःस्त्रीदुःखीवेदमार्गपरायणः २६ दातादक्षःकविर्वृद्धोगांधर्वेवाद्यकेरतः सर्व
लोकप्रियोनित्यंकन्याजातोभवेन्नरः २७ अस्थानरोषणोदुःखीपटुभाषीकृपान्वितः चंचलाक्षश्चलक्ष्मीकोगृहमध्येतिविक्रमः ॥
२८ वाणिज्यदक्षोदेवानांपूजकोमित्रवत्सलः प्रवासीसुहृदामिष्टोजूकेजातोभवेन्नरः २९ बालप्रवासीक्रूरात्माशूरःपिंगललोचनः प
रदाररतोमानीनिष्ठुरःस्वजनेजने ३० साहसप्राप्तलक्ष्मीकोजनन्यामपिदुष्टधीः धूर्तश्चोरफलारंभीवृश्चिकेदोभवेन्नरः ३१ क्रूरः

ल० समधियायुक्तःसात्विकोजननंदनः शिल्पविज्ञानसंपन्नो धनाढ्योदिव्यभार्यकः ३२ मानीचरित्रसंपन्नोललिताक्षरभाषणः तेजस्वीस्थूल
चं० देहश्चधनुर्जातःकुलांतकः ३३ कुलेनेष्टोवशःस्त्रीणांपंडितःपरिचारकः गीतज्ञोलालसीगुह्यःपुत्राढ्योमातृवत्सलः३४ धनीत्यागीसुभृ
७ त्यश्चदयालुर्बहुबांधवः परिचिंतितसौख्यश्चमकरेंदौभवेन्नरः ३५ दातालसःकृतज्ञश्चगजवाजिधनेश्वरः शुभदृष्टिःसदासौम्योमा
नविद्याकृतोद्यमः ३६ पुण्याढ्यःस्नेहहीनश्चधनीभोगीसशक्तिकः शालूरकुक्षिर्निर्भीतःकुंभेंदौजायतेनरः ३७ गंभीरचेष्टितःशूरःप
टुर्वाग्मीनरोत्तमः कोपनःकृपणोज्ञानीगुणश्रेष्ठःकुलप्रियः ३८ नित्यसेवीशीघ्रगामीगांधर्वकुशलःशुभः मीनमेंदौसमुत्पन्नोजाय
तेबंधुवत्सलः ३९ अथसंक्षेपेणमेषादिभस्थचंद्रफलं० मेषेदीनोवृषेमानीनानाबुद्धिश्चमन्मथे क्रूरःकर्केधृतिःसिंहेकन्यायांबहुभा
षिता ४० जूकेस्थिरस्त्वलौमानीचापेपापाशयोनरः मुखरोमकरेकुंभेचतुरःस्थिरधीर्झषे ४० इतिमेषादिजन्मराशिस्थचंद्रफला
नि॥अथमेषादिलग्नोत्पन्नफलं०॥मेषलग्नेसमुत्पन्नश्चंडोमानीसुधीःशुभः क्रोधीचजनहंताचविक्रमीपरवत्सलः ४१ वृषलग्नभवोवा
लोगुरुभक्तःप्रियंवदः गुणीकृतीधनीलुब्धःशूरःसर्वजनप्रियः ४२ मिथुनोदयजातस्तुमानीस्वजनवत्सलः त्यागीभोगीधनीका
मीदीर्घसूत्रोरिमर्दनः ४३ कर्कलग्नेसमुत्पन्नोभोगीधर्मीजनप्रियः मिष्टान्नपानभोगीचसौभाग्यःस्वजन प्रियः ४४ सिंहलग्नोद राम०
येजातोभोगीशत्रुविमर्दकः स्वल्पोदरोल्पपुत्रश्चसोत्साहीरणविक्रमः ४५ कन्यालग्नभवोवालोनानाशास्त्रविशारदः सौभाग्यगु ७
णसंपन्नोसुंदरःसुरतप्रियः ४६ तुलालग्नोदयेजातःसुधीःसत्कर्मजीवनः विद्वान्सर्वकलाभिज्ञोधनाढ्योजनपूजितः ४७ वृश्चिको
दयजोबालःशौर्यवानतिधृष्टधीः विज्ञानज्ञानसंपन्नःसुखीसुविग्रहःसुधीः ४८ धनुर्लग्नोदयेजातोनीतिमान्गुणवान्सुधीः कु

लमध्येप्रधानश्च प्राज्ञः सर्वस्य पोषकः ४९ मकरोदयजो बालो नीचकर्मा बहुप्रजः लुब्धः स्वस्थो लसोदीनः स्वकार्येषु कृतोद्यमः ५० ॥
कुंभलग्नोदये जातश्चलचित्तो ति सौहृदः परदाररतो नित्यं मृदुकायो महासुखी ५१ मीनलग्नोद्भवो बालो रत्नकांचनपूरितः अत्य-
कामो तिरक्तश्च दीर्घकालविचिंतकः ५२ ॥ इति जन्मलग्नफलम् ॥ क्रूरसंगी धनैर्हीनः कुलसंतापकारकः व्यसनासक्तचित्तश्च प्रतिप
त्तिथिजो नरः ५३ परदाररतो नित्यं सत्यशौचविवर्जितः तस्करः स्नेहहीनश्च द्वितीयायां भवेन्नरः ५४ अचेतनो तिविकलो निर्द्रव्यो वि
फलः सदा परद्वेषरतो नित्यं तृतीयासंभवो नरः ५५ महाभोगी च दाता च मित्रस्नेहविचक्षणः धनसंतानसंयुक्तश्चतुर्थ्यां यदि जायते ॥
५६ व्यवहारी गुणग्राही पितृमातृश्च रक्षकः दाता भोक्ता तनुप्रीतिः पंचमीसंभवो नरः ५७ नानादेशाभिगामी च सदा कलहकारकः नि
त्यं जठरदोषी च षष्ठीजातो भवेन्नरः ५८ अल्पतोषी च तेजस्वी सौभाग्यगुणसुंदरः पुत्रवान्धनसंपन्नः सप्तमीसंभवो नरः ५९ धर्मि
ष्ठः सत्यवादी च दाता भोक्ता च वत्सलः गुणज्ञः सर्वकार्येष्वष्टमीसंभवो नरः ६० देवताराधकः पुत्री धनी स्त्रीमग्नमानसः शास्त्राभ्या
सरतो नित्यं नवम्यां यदि जायते ६१ दशम्यां धर्मकर्मज्ञो देवसेवी च जापकः गुणी धनी वेदविज्ञो बंधुविप्रप्रियो जनः ६२ एकादश्यां न
रेंद्रस्य गेहगामी शुचिर्भवेत् धर्मज्ञश्च विवेकी च गुरुशुश्रूषको गुणी ६३ चपलश्चंचलज्ञानः सदा क्षीणस्वरूपकः देशभ्रमणशील
श्च द्वादशीजातको भवेत् ॥ ६४ ॥ महासिद्धो महाप्राज्ञः शास्त्राभ्यासी जितेंद्रियः परकार्यरतो नित्यं त्रयोदश्यां यदा भवेत् ६५ धनाढ्यो ध
र्मशीलश्च शूरः सद्वाक्यपालकः राजमान्यो यशस्वी च चतुर्दश्यां यदा भवेत् ६६ श्रीयुतो मतियुक्तश्च महाभोजनलोलसः उज्ज्वलः पर
दारेषु विरतः पूर्णिमाभवः ६७ स्थिरारंभः परद्वेषी वक्रो मूर्खः पराक्रमी गूढमंत्री च संज्ञानी त्वमावास्याभवो नरः ६८ निर्विद्यायां तिथौ

ल० सौम्यंविद्यायांचसुभंफलं अनिष्टंपापविद्ध्यांतिथौभवतिनिश्चितं ६९॥इतिप्रतिपदादिजन्मतिथिविशेषफलं॥नंदातिथौनरोजातोम
चं० हामानीचकोविदः देवताभक्तिनिष्टश्चज्ञानीचप्रियवत्सलः ७० भद्रातिथौवंधुमान्योराजसेवीधनान्वितः संसारभयभीतश्चपर
८ मार्थमतिर्नरः ७१ जयातिथौराजपूज्यःपुत्रपौत्रादिसंयुतः शूरःशांतश्चदीर्घायुर्महावित्तश्चजायते ७२ रिक्तातिथौवित्तहीनःप्र
मादीगुरुनिंदकः शास्त्रहामतहंताचकामुकश्चनरोभवेत् ७३ पूर्णातिथौधनैःपूर्णोवेदशास्त्रार्थतत्त्ववित् सत्यवादीशुद्धचेताजा
तोभवतिमानवः ७४॥इतिनंदादिपंचतिथिसामान्यफलम्॥विष्कुंभजातोमनुजोरूपवान्गुणवान्भवेत् नानालंकारसंपूर्णोम
हाबुद्धिविशारदः ७५ प्रीतियोगेसमुत्पन्नोयोषितांवल्लभोभवेत् तत्त्वज्ञश्चमहोत्साहीस्वार्थेनित्यंकृतोद्यमः ७६ आयुष्मान्नोम्नि
योगेचजातोमानीधनीकविः दीर्घायुःसत्वसंपन्नोयुद्धेचाप्यपराजितः ७७ सौभाग्येयःसमुत्पन्नोराजमंत्रीचजायते निपुणः
सर्वकार्येषुवनितानांचवल्लभः ७८ शोभनेशोभनोबालोबहुपुत्रकलत्रवान् आतुरःसर्वकार्येषुयुद्धभूमौसदोत्सुकः ७९ अति
गंडेचयोजातोमातृहंताभवेच्चसः गंडांतेषुचजातस्तुकुलहंताप्रकीर्तितः ८० सुकर्मणिचयोजातःसुकर्माजायतेनरः सर्वैःप्री
तःसुशीलश्चरागीभोगीगुणाधिकः ८१ धृतियोगेचधृतिमान्कीर्तिपुष्टिधनान्वितः भाग्यवान्गुणसंपन्नोविद्यावान्रूपवान्भवेत् ८२ रा०
शूलेशूलव्यथायुक्तोधार्मिकःशास्त्रपारगः विद्यार्थीकुशलोयज्वाजायतेमनुजःसदा ८३ गंडेगंडव्यथायुक्तोबहुक्लेशोमहाशिराः ८
ह्रस्वकायोमहास्थूलोबहुभोगोदृढव्रतः ८४ वृद्धियोगेचदीर्घायुःसर्वेषांप्रियदर्शनः सुरूपोबहुपुत्रश्चकलावान्सुकलत्रवान् ८५
ध्रुवयोगेतिशक्तश्चस्थिरकर्मासदानरः धनवानतिभोक्ताचसत्ववानपिजायते ८६ व्याघातयोगेजातस्तुसर्वज्ञःसर्वपूजितः स

वैकर्मकरोलोकेख्यास्यातःसर्वकर्मसु ८७ हर्षणेजायतेलोकेमहाभोगीन्नृपप्रियः हृष्टःसदाधनैर्युक्तोवेदशास्त्रविशारदः ८८ व
ज्रयोगेवज्रमुष्टिःसर्वविद्यासुपारगः धनधान्यसमायुक्तोमनुजोवज्रविक्रमः ८९ सिद्धियोगेसमुत्पन्नःसर्वसिद्धियुतोभवेत् ॥
दाताभोक्तासुखीकांतःशोकीरोगीचमानवः ९० व्यतीपातेचसंजातोमहाकष्टेनजीवति जीवेच्चेद्भाग्ययोगेनसभवेदुत्तमोनृणां॥
९१ योगेवरीयसिभवोवरिष्ठोजायतेनरः शिल्पकाव्यकलाभिज्ञोगीतनृत्यादिकोविदः ९२ परिघेचनरोजातःस्वकुलोन्नतिकारकः
शास्त्राभिज्ञःकविर्वाग्मीदाताभोक्ताप्रियंवदः ९३ शिवयोगेनरोजातःसर्वकल्याणकारणः महादेवसमोलोकेमहाबुद्धिवरप्रदः॥
९४ सिद्धयोगेसिद्धिदातामंत्रसिद्धिप्रवर्तकः दिव्यनारीसमेतश्चसर्वसंपद्युतोभवेत् ९५ साध्यमानस्विकासिद्धिर्यशोशेषःसुखाग
मः दीर्घसूत्रःप्रसिद्धश्चजायतेसर्वसंमतः ९६ शुभेशुभयुतैर्युक्तोधनवानपिजायते विज्ञानशास्त्रसंपन्नोदाताब्राह्मणपूजकः
९७ शुक्लेसर्वकलायुक्तःसर्वार्थज्ञानवान्भवेत् कचित्प्रतापीशूरश्चधनीसर्वजनप्रियः ९८ ब्रह्मयोगेमहाविद्वान्वेदशास्त्रपरायणः
ब्रह्मज्ञानरतोनित्यंसर्वकार्येषुकोविदः ९९ ऐंद्रेभूपकुलेजातोराजाभवतिविश्रुतः अल्पायुश्चसुखीभोगीगुणवानपिजायते १००
वैधृतौजायतेमर्त्योनिरुत्साहोबुभुक्षितः कुर्वाणोपिजनैःप्रीतिंप्रयात्यप्रियतांनरः १ इतिविष्कुंभादिजन्मयोगफलम्॥ ववाख्ये
करणेजातोमानीधर्मरतःसदा शुभमंगलकर्माचस्थिरकर्माचजायते २ बालवेकरणेजातोदेवतीर्थादिसेवकः विद्यावान्सौख्यसं
पन्नोराजमान्यश्चजायते ३ कौलवेचनरोजातःप्रीतिःसर्वजनैःसह संगतिर्मित्रवर्गैश्चमानवैश्चापिमित्रता ४ तैतिलेकरणेजा
तःसौभाग्यगुणसंयुतः स्नेहःसर्वजनैःसार्धंविचित्राणिगृहाणिच ५ गराख्येकृषिकर्माचगृहकार्यपरायणः यद्वस्तुकांक्षितंत

ल० धलभ्यतेनमहोद्यमैः ६ वणिजेकरणेजातोवाणिज्येनैवजीवति वांछितंलभतेलोकेदेशांतरगमागमौ ७ विष्ट्याख्येकरणेजातोह्यसु
चं० भारंभशीलवान् कुशलोविषकार्येषुपरघातरतःसदा ८ शकुनौजन्मयस्यभूत्पौष्टिकादिक्रियाकृती औषधादिषुदक्षश्चभिषग्वृ
९ त्तिश्चजायते ९ करणेचचतुष्पादेदेवद्विजरतःसदा गोकर्मागोप्रभुर्लोकेचतुष्पाद चिकित्सकः १० नागाख्येकरणेजातःस्थावर
प्रीतिकारकः कुरुतेदारुणंकर्मदुर्भगोलोललोचनः ११ किंस्तुघ्नेकरणेजातःशुभकर्मरतोनरः तुष्टिंपुष्टिंचमांगल्यंसिद्धिंचल
भतेसदा १२ इतिबवादिकरणजन्मफलं० पिशुनश्चपलोदुष्टःपापकर्मानिराकृतिः परेषांव्यसनेसक्तश्चौरश्चप्रथमांशके १३
उत्पन्नविभवोभोक्तासंग्रामविगतस्पृहः गंधर्वप्रमदासक्तोद्वितीयांशेनरोभवेत् १४ धर्मिष्ठःसततव्याधिःसर्वसारज्ञएवच सर्व
ज्ञोदेवताभक्तस्तृतीयांशेचजायते १५ चतुर्थांशेभिजातस्तुदीक्षितोगुरुभक्तिमान् यत्किंचिद्भूमिगंवस्तुतत्सर्वंलभतेचसः १६
सर्वलक्षणसंपन्नोराजाभवतिविश्रुतः दीर्घायुर्बहुपुत्रश्चजायतेपंचमांशके १७ स्त्रीनिर्जितःशुभैर्हीनोबहुभाषीनपुंसकः अ
र्थध्वंसःप्रमादीचषष्ठांशेजायतेनरः १८ विक्रांतोमतिमान्शूरःसंग्रामेष्वपराजितः महोत्साहीचसंतोषीजायतेसप्तमांशके १९ कृत
घ्नोमत्सरीक्रूरःक्लेशभोक्ताबहुप्रजः फलकालपरित्यागीजायतेचाष्टमांशके २० क्रियासुकुशलोदक्षःसुप्रतापीजितेंद्रियः भस्मै ए०
श्चावेष्टितोनित्यंजायतेनवमेंशके २१ इतिजन्मराशिनवांशफलम्० सुंदरोदानशीलश्चमतिमान्सबलःसदा अल्पभोगीमहा ९
प्राज्ञोनरोदेवगणोद्भवः २२ मानीधनीविशालाक्षोलक्ष्यवेधीधनुर्धरः गौरःपौरजनाह्लादीनरोमर्त्यगणोद्भवः २३ उन्मादीभीष
णाकारःसर्वदाकलिवल्लभः नरोदुःखीसदाजातःप्रमेहीराक्षसेगणे २४ इतिगणफलम्० महोद्यमोमनस्वीचतेजस्वीबहुका

यंकृत् नानादेशरतोभिज्ञोवसंततुंभवोनरः २५ बहुारंभोजितक्रोधःक्षुधालुःकामुकोनरः दीर्घःशूरोबुद्धिमांश्चग्रीष्मेजातःसदा
शुचिः २६ गुणवान्भोगयुक्तश्चराजपूज्योजितेंद्रियः कुशलोधातुवादीचवर्षर्तौत्थोनरोभवेत् २७ वाणिज्यकृषिवृत्तिश्चधनधा
न्यसमृद्धिमान् तेजस्वीबहुमान्यश्चशरज्जातोनरोमतः २८ बहुवीर्योनीतिविज्ञोग्रामयुक्तःसदोद्यमी हृस्वपादगलोभीरुर्हेमंते
जायतेनरः २९ रूपयौवनसंपन्नोदीर्घसूत्रोमहोत्कटः क्षुधायुक्तःकामुकश्चशिशिरर्तौभवोनरः ३० इतिऋतुफलम्० पूर्ण
चन्द्रनिभःश्रीमान्सोद्यमीबहुशास्त्रवित् कुशलोज्ञानसंपन्नःशुक्लपक्षभवोनरः ३१ निष्ठुरोदुर्मुखोमूर्खःस्त्रीद्वेषीचजनोज्झि
तः जायतेचपरप्रेष्यःकृष्णपक्षोद्भवोनरः ३२ इतिपक्षफलम्० महाधनीमहोग्रश्चतुंगस्थेभास्करेनरः सुभूषणोमहाभोगीध
नीतुंगेनिशाकरे ३३ उच्चेभौमेसुपुनश्चतेजस्वीगर्वितोनरः मेधावीदृढवाक्यश्चबलाढ्यश्चबुधेभवेत् ३४ राजपूज्यश्चविख्या
तोविद्वानार्योगुरौनरः स्वोच्चेशुक्रेविलासीचहास्यगीतादिसंयुतः ३५ स्वोच्चगेरविपुत्रेचचक्रवर्तीधनीभवेत् राजलब्धनियो
गश्चराहुःशनिसमोमतः ३६ इतिरव्यादीनांस्वोच्चगतफलम्० धनीसुखीकार्यविज्ञोरवौमूलत्रिकोणगे चंद्रेधनीसुभोक्ताचभौ
मेक्रूरोदयःखलः ३७ बुधेत्रिकोणेविज्ञश्चविनोदीविजयीनरः गुरौग्रामपुरादीनांमठस्यचपतिर्भवेत् ३८ शुक्रेत्रिकोणेसुख
श्चसुखयुक्तोमहोत्तमः मंदेनरोधनैःपूर्णोमहाशूरःकुलंधरः ३९ सिंहवृषाजप्रमदाकार्मुकभृत्तौलिकुंभधराः मूलत्रिकोणानि
रविग्लौभौमज्ञेज्यशुक्रसौरीणाम् ४० इतिमूलत्रिकोणस्यफलम्० स्वगृहस्थेरवौलोकेमहोग्रश्चमहोद्यमी चंद्रेधर्मरतःसाधु
र्मनस्वीरूपवानपि ४१ स्वगृहस्थेकुजेमहन्नोधनवानपराजितः बुधेनानाकलाभिज्ञःपंडितोधनवान्नरः ४२ धनीकाव्यश्रुति

ल० ज्ञश्चसुचेष्टः स्वगृहे गुरौ स्फीतः कृषीवलः शुक्रे शनौ मान्यः खलो नरः ४३ ॥ इति स्वगृहस्थफलम् ॥ सूर्ये मित्रगृहे ख्यातः शास्त्रज्ञः स्थिरसौ
चं० हृदः चंद्रे नरो भाग्ययुक्तश्चतुरो धनवानपि ४४ भौमे शास्त्रोपजीवी च बुधे रूपधनान्वितः गुरौ मित्रगृहे पूज्यः सतां सत्कर्मसंयुतः ४५
१० शुक्रे मित्रगृहे लोके धनी बंधुजनप्रियः शनौ परान्नभोजी च कुकर्मनिरतो नरः ४६ इति मित्रराशिस्थरव्यादिफलम्० नीचे सूर्ये
भवेत्प्रेष्यो बंधुभिर्वर्जितो नरः चंद्रे रोगी स्वल्पपुण्यो दुर्भगो नीचराशिगे ४७ नीचे भौमे भवेन्नीचः कुत्सितो व्यसनातुरः बुधे क्षुद्रो
बंधुवैरी गुरौ दीनो मलान्वितः ४८ शुक्रे नीचे नष्टदारः स्वतंत्रः शीलवर्जितः शनौ काणो दरिद्रश्च गताचारोतिगर्हितः ४९ इति नी
चस्थफलम् ॥ सूर्ये रिपुगृहे निःस्वो विषयैः पीडितो नरः चंद्रे हृद्रोगी च भौमे जायाजडो धनः ५० बुधे रिपुगृहे मूर्खो वाग्घनो दुः
खपीडितः जीवे रिभे नरः क्लीबो नाशहृतिर्बुभुक्षितः ५१ शुक्रे शत्रुगृहे भृत्यः कुबुद्धिर्दुःखितो नरः शनौ व्याध्यर्थशोकेन संतप्तो
मलिनो भवेत् ५२ इति शत्रुराशिस्थफलम्० ॥ अथाश्विन्यादिजन्मनक्षत्रफलम्० सुरूपः सुभगो दक्षः स्थूलकायो महाधनी ॥
अश्विनीसंभवो लोके जायते धनवल्लभः ५३ अरोगी सत्यवादी च सप्राणश्च दृढव्रतः भरण्यां जायते लोके सुसुखी मतिमानपि ॥
५४ कृपणः पापकर्मा च क्षुधालुर्नित्यपीडितः अकर्म कुरुते नित्यं कृत्तिकासंभवो नरः ५५ धनी कृतज्ञो मेधावी नृपमान्यः प्रियंवदः रा०
सत्यवादी सुरूपश्च रोहिणीजो भवेन्नरः ५६ चपलश्चतुरो धीरः क्रूरकर्माप्यकर्मकृत् अहंकारी परद्वेषी मृगे भवति मानवः ५७ कृ १०
तज्ञो गर्वितो हीनो नरः पापरतः शठः आर्द्रानक्षत्रसंजातो धनधान्यविवर्जितः ५८ शांतः सुखी च भोगी च सुभगो जनवल्लभः पुत्रमि
त्रादिभिर्युक्तो जायते च पुनर्वसौ ५९ देवधर्मरतो नित्यं बुद्धियुक्तो धनप्रियः पुष्यर्क्षे जायते लोके शांतात्मा सुभगः सुखी ६० ॥

सर्वभक्षःकृतांतस्त्वकृतघ्नोवंचकःखलः॥आश्लेषायांनरोजातःकृतकर्मीचजायते ६१ कल्याणंप्रथमेपादेद्वितीयेचधनक्षयः
मातृपीडातृतीयेचपितुःसार्पेचतुर्थके ६२ बहुभृत्योधनीभोगीपितृभक्तोमहोद्यमी चमूनाथोराजसेवीमघायांजायतेनरः ६३
विद्यागोधनसंयुक्तोगंभीरःप्रमदाप्रियः पूर्वाफाल्गुनिजातस्तुसुखीपंडितपूजितः ६४ दाताशूरोमृदुर्वक्ताधनुर्वेदार्थपंडितः॥
उत्तराफाल्गुनीजातोमहायोद्धाजनप्रियः ६५ असत्यवचनोधृष्टःसुरापोबंधुवर्जितः हस्तेजातोभवेच्चौरोजायतेपरदारकः ६६
पुत्रदारसुतस्तुष्टोधनधान्यसमन्वितः देवब्राह्मणभक्तश्चचित्रायांजायतेनरः ६७ विदग्धोधार्मिकोल्पार्थःकृपणःप्रियवल्लभः॥
सुखीस्वदेवभक्तश्चस्वातौजातोभवेन्नरः ६८ अतिलुब्धोतिपापीचनिष्ठुरःकलहप्रियः विशाखायांनरोजातोवेश्याजनरतोभवे
त् ६९ पुरुषार्थीप्रवासीचबंधुकार्येसदोद्यमी अनुराधाभवोलोकःसदाहृष्टश्चजायते ७० बहुमित्रःप्रधानश्चविद्यार्थीचविचक्ष
णः ज्येष्ठाजातोधर्मरतोजायतेधर्मपूजितः ७१ स्थिरभोगीचमानीचधनवांश्चसुखीभवेत् तृतीयपादेतुर्येचमूलाद्येद्वैपमित्यजेत्
७२ आद्यपादेपितुःपीडामूलेमातुर्द्वितीयके तृतीयेधनहानिश्चचतुर्थेसर्वदासुखं ७३ हृष्टमानोपकारीचभाग्यवांश्चजनप्रियः॥
पूर्वाषाढाजातनरःसकलार्थविचक्षणः ७४ बहुमित्रोमहाकायोधार्मिकोविनयीसुखी उत्तराषाढसंभूतःशूरश्चविजयीरणे ७५॥
कृतज्ञोविनयीदातासदारोगविवर्जितः श्रीमांश्चबलसंतानःश्रवणेजायतेनरः ७६ गीतप्रियोबंधुमान्योहेमरत्नैरलंकृतः धनिष्ठा
यांनरोजातश्चैकःशतपतिर्भवेत् ७७ कृपणोधनपूर्णश्चपरदारोपसेवकः मानवःशततारायांविदेशगमनेरतः ७८ वक्तासुखी
प्रजायुक्तोबहुनिद्रोनिरर्थकः पूर्वाभाद्रपदाजातोनरोभवतिदुःखितः ७९ गौरःसमस्तधर्मज्ञःशत्रुघातीचयामरः उत्तराभाद्रन॥

ल० क्षत्रजातःसाहसिकोभवेत् ८० संपूर्णांगःशुचिर्दक्षःसाधुःशूरोविचक्षणः रेवतीसंभवोलोकेधनधान्यैरलंकृतः ८१ निर्वेधेसौम्यसंयु
चं० क्तेनक्षत्रेशोभनं फलं विपरीतफलंतस्मिन्सवेधेक्रूरपीडिते ३८२ ॥इतिजन्मनक्षत्रफलम्॥ ॥इतिजातकलग्नचंद्रिकायांप्रथ
११ मःपरिच्छेदः १ ॥लग्नेसूर्येतितीव्रश्चचंचलात्मास्मरातुरः नेत्ररोगीपीडितांगोजायतेचारुणाकृतिः १ सूर्येधनेविवादीचबहुशत्रु
श्चनिर्धनः परापवादीसेर्ष्यश्चकृतघ्नश्चनरोभवेत् २ तृतीयगेदिवानाथेप्रसिद्धोरोगवर्जितः भूपतिश्चदयालुश्चसुशीलःसभवे
न्नरः ३ सूर्येचतुर्थेदुर्बुद्धिःकृशांगःसुखवर्जितः अप्रभावोनिष्ठुरश्चदुष्टसंगीभवेन्नरः ४ पंचमेर्केकोपसुतोकुरूपःशीलवर्जितः
कुसंगलब्धवृत्तिश्चगतमानश्चजायते ५ षष्ठेसूर्येगतारिश्चख्यातमानःसुखीशुचिः शूरोनुरागीभूपालसंमतश्चभवेन्नरः ६ स
प्तमेर्केकुदारश्चदुष्टप्रीतोल्पपुत्रकः गुह्यरोगीसपापश्चजातकोहिप्रजायते ७ अष्टमस्थेदिवानाथेकलहप्रोहीनमानसः शत्रु
दग्धोवृथागामीबंधुहीनश्चजायते ८ नवमस्थेरवौजातःकुकर्माभाग्यवर्जितः विद्याविवेकहीनश्चकुशीलश्चप्रजायते ९ द
शमेर्केबंधुहीनःकुकर्माशीलवर्जितः स्त्रीचंचलोहीनतेजाःहीनकोशश्चजायते १० लाभेसूर्येसमुत्पन्नोनानालाभसमन्वितः सा
त्त्विकोधार्मिकोमानीरूपवानपिजायते ११ व्ययेसूर्येनरोरोगीसत्वहीनोवृथाटनः असह्यपीपुत्रदारभक्तिहीनश्चजायते १२ ॥ ग०
इतिसूर्यद्वादशभावफलानि ॥ लग्नेचंद्रेजडःक्षुद्रःप्रसन्नोधनपूरितः स्त्रीवल्लभोधार्मिकश्चकृतघ्नश्चनरोभवेत् १३ चंद्रेध ११
नेधनैःपूर्णोनृपपूज्योगुणान्वितः शास्त्रानुरागीसुभगोजनप्रीतश्चजायते १४ तृतीयस्थेनिशानाथेधनविद्यादिभिर्युतः क
फाधिकःकामुकश्चवंशासख्योपिजायते १५ चतुर्थस्थेनिशानाथेपुत्रदारसमन्वितः धनीसुखीयशस्वीचविद्यावानपिसत्कृतः।

१६ सुतेचंद्रेसुताढ्यश्चरोगीकामीभयानकः हानिभैःपौरुषैर्युक्तोविनयीचभवेन्नरः १७ षष्ठेचंद्रेवित्तहीनोमृदुकायोतिलालसः
मंदाग्निस्तीक्ष्णदृष्टिश्चपापबुद्धिर्भवेन्नरः १८ चंद्रेचसप्तमेजातोदुःखीकष्टीचवंचकः कृपणोबहुवैरीचजायतेपारदारिकः १९
अष्टमेतारकानाथेदीनोल्पायुःसकष्टकः प्रगल्भश्चकृशांगश्चपापबुद्धिर्भवेन्नरः २० धर्मेचंद्रेचारुकांतिःसधर्मनिरतःसदा॥
वीतरोगःसतांश्लाघ्यःपापहीनश्चजायते २१ कर्मस्थानेसुधारश्मौबहुभाग्योमहाधनी मनस्वीचमनोज्ञश्चराजमान्यश्चजा
यते २२ लाभेचंद्रेलाभयुतःप्रगल्भःसुभगोनरः सुमार्गगामीलज्जालुःप्रतापीभाग्यवान्भवेत् २३ व्ययेचंद्रेपापबुद्धिर्बहुभक्षीप
राजितः कुलाधमोमद्यपीचविकारीजातकोभवेत् २४ ॥इतिलग्नादिद्वादशभावस्थचंद्रफलम्॥ भौमेलग्नेकुरूपश्चरोगीबं
धुविवर्जितः असत्यवादीनिर्द्रव्योजायतेपरदारकः २५ धनेकुजेधनैर्हीनःक्रियाहीनश्चजायते दीर्घसूत्रोसत्यवादीयुत्र
वानपिमानवः २६ तृतीयगेकुजेजातःप्रतापीशीलसंयुतः रणेशूरोराजमान्योभुविख्यातश्चजायते २७ चतुर्थेभूसुतेकष्टःपि
ताधिकोरिनिर्जितः बंधुस्नेहहीनपुत्रोमहाकामीचजायते २८ पंचमस्थेधरासूनौकुसंतानःसदारुजः बंधुवर्गेविरक्तश्चन
रोबुद्धिविवर्जितः २९ षष्ठेभौमेशत्रुहीनोनानार्थैःपरिपूरितः स्त्रीलालसःपुष्टदेहःशुभचित्तश्चजायते ३० भूमिपुत्रेसप्तमगेरु
धिरात्कोपिकोपवान् नीचसेवीवंचकश्चनिर्गुणोपिभवेन्नरः ३१ अष्टमेमंगलेकुष्ठीस्वल्पायुःशत्रुपीडितः अल्पद्रव्यःस
रोगश्चनिर्गुणोपिहिजायते ३२ धर्मस्थेधरणीपुत्रेकुकर्मोगतपौरुषः नीचानुरागीक्रूरश्चसकष्टश्चप्रजायते ३३ कर्मभावेमहीपुत्रेशु
भकर्माशुभान्वितः सुपुत्रीस्यात्सुखीशूरोरोगविष्टोपिभवेन्नरः ३४ लाभेभौमेभूरिलाभोनानापापान्नभक्षकः नेत्ररोगीभूपमान्योदेव

लं० छिद्ररतोनरः ३५ असद्व्ययीव्ययेभौमेनास्तिकोनिष्ठुरःशठः बहुवैरीविदेशेचसदागच्छतिमानवः ३६ इतिलग्नादिगभौमभावफलम्०
चं० लग्नेबुधेचगीतज्ञोनिष्पापोभूपपूजितः रूपज्ञानयशोयुक्तःप्रगल्भोमानवोभवेत् ३७ धनभावेचंद्रपुत्रेधनधान्यादिपूरितः सुभ
१२ कर्मासुखीनित्यंराजपूज्यश्चजायते ३८ तृतीयस्थेबुधेजातःप्रशस्तोबंधुमानितः धर्मध्वजीयशस्वीचगुरुदेवार्चकोभवेत् ३९॥
चतुर्थेचंद्रपुत्रेचबहुभृत्ययशोन्वितः पटुवाक्योभाग्ययुक्तःसत्यवादीचजायते ४० पंचमेरोहिणीपुत्रेपुत्रपौत्रसमन्वितः सुबुद्धिः
सत्वसंपन्नःसुखीभवतिमानवः ४१ षष्ठेबुधेनृशंसश्चविरोधीसर्वबंधुषु ईर्ष्याधिकःकामपरोविद्वानपिभवेन्नरः ४२ सप्तमस्थेसो
मपुत्रेरूपविद्याधिकोनरः॥ सुशीलःकामशास्त्रज्ञोनारीमान्यश्चजायते ४३ बुधेष्टमेकृतघ्नश्चकुबुद्धिःपारदारिकः कामातुरोऽस
त्यवादीरोगयुक्तोभवेन्नरः ४४ धर्मेबुधेधार्मिकश्चकूपारामादिकारकः सत्यवादीचदांतश्चजायतेपितृवत्सलः ४५ दशमस्थे
बुधेजातोधनधान्ययशोन्वितः बहुभाग्यश्चविजयीकांतियुक्तश्चमानवः ४६ लाभेबुधेनित्यलाभोनीरोगश्चसदासुखी जनानु
रागवृत्तिश्चकीर्तिमानपिजायते ४७ बुधेव्ययेव्ययीलोकेरोगीबंधुसमन्वितः पापासक्तःपराधीनःपरपक्षीचजायते ४८ इतिबु
धद्वादशभावफलम्० लग्नेगुरौसुशीलश्चप्रगल्भोरूपवानपि नृपाभीष्टश्चनीरोगीज्ञानीसौम्यश्चजायते ४९ धनेजीवेधनीलोकः ग०
कृतज्ञोबंधुसंयुतः गजाश्वमहिषीयुक्तःकांतिमानपिजायते ५० जीवेतृतीयेतेजस्वीकर्मदक्षोजितेंद्रियः मित्रान्नसुखसंपन्नः १२
तीर्थयात्राप्रियोभवेत् ५१ सुखेजीवेसुखीलोके सुभगोराजपूजितः विजितारिःकुलाध्यक्षोगुरुभक्तश्चजायते ५२ सुतेजीवेसु
तैर्युक्तोधार्मिकःपंडितःसुखी सद्बुद्धचेतादयायुक्तोविनयीचभवेन्नरः ५३ षष्ठेगुरौविघ्नयुक्तोबहुशत्रुश्चनिष्ठुरः उद्वेगीमतिहीन

श्चकामुकोजायतेनरः ५४ सप्तमस्थेसुराचार्ये कामचित्तोमहाबलः धनीदाताप्रगल्भश्चचित्रकर्माप्रजायते ५५ जीवेष्टमेसदारोगी
कृपणःशोकसंयुतः बहुवैरीकुकर्माचकुरूपश्चभवेन्नरः ५६ धर्मेजीवेधर्मकर्तासाधुसंगीचशास्त्रवित् विनयीतीर्थसेवीचब्रह्म
ज्ञश्चसजायते ५७ कर्मभावगतेजीवेपुण्यकीर्तिसुखान्वितः राजतुल्यः सुरूपश्चदयालुर्जायतेनरः ५८ लाभेगुरौविवेकी।
स्याद्वस्त्रश्वादिधनैर्युतः अलोलुपःसुरूपश्चगुणवानपिजायते ५९ व्ययेबृहस्पतौरोगीव्यसनीपरधर्मकृत् बंधुवैरीनीचसे
वीगुरुद्वेषीचजायते ६० इतिगुरुद्वादशभावफलम्० लग्नेशुक्रेसुशीलश्चवृत्तिवानपिसुंदरः सुचिर्विद्वान्मनोज्ञश्चधार्मि
कश्चभवेन्नरः ६१ धनेशुक्रेधनीविद्वान्बंधुमान्योनृपार्चितः यशस्वीगुरुभक्तश्चकृतज्ञश्चभवेन्नरः ६२ भार्गवेसहजेजातोध
नधान्यसुतान्वितः निरोगोराजमान्यश्चप्रतापीचापिजायते ६३ सुखेशुक्रेसुखीवित्तोबहुभार्योधनान्वितः ग्रामाधिपोयश
स्वीस्याद्विवेकीचभवेन्नरः ६४ सुतेशुक्रेसमृद्धश्चसुरूपोपिसदानरः पुत्रकन्यापौत्रयुक्तःसुभगोपिभवेन्नरः ६५ षष्ठेशुक्रेभवेद्दं
भीजाड्यहानिर्भयान्वितः दुःसंगीकलहीतातद्वेषीचैवसदानरः ६६ सप्तमेभृगुपुत्रेस्याद्धनीदिव्यांगनायुतः नीरोगःसुखसं
पन्नोबहुभाग्यश्चजायते ६७ अष्टमस्थेदैत्यपूज्येसरोगःकलहप्रियः वृथाटनीकार्यहीनोजनानांचप्रियोमतः ६८ धर्मेशुक्रेध
र्मपूर्णोज्ञानदृढःसुखीधनी नरेंद्रमान्योविजयीनराणांचप्रियःसदा ६९ कर्मस्थितेभृगोःपुत्रेसुकर्मानिधिरत्नवान् राजसेवी।
धार्मिकश्चजायतेदयिताप्रियः ७० लाभेशुक्रेसदालाभोयशःसत्सगुणान्वितः धनीभोगीक्रियाशुद्धोजायतेमानवोत्तमः ७१॥
व्ययेशुक्रेव्ययाढ्यश्चगुरुमित्रविरोधवान् मिथ्यावादीबंधुवर्गेगुणहीनोपिजायते ७२॥ इतिशुक्रद्वादशभावफलम्०॥लग्नेश

ल० नौसदारोगीकुरूपःकृपणोनरः कुशीलःपापबुद्धिश्च शठश्चभवतिध्रुवम् ७३ धनेमंदेधनैर्हीनोवातपित्तकफातुरःदिह्मांधःस्थिररो
चं० गश्चगुणैःस्वल्पोपिजायते ७४ छायात्मजेतृतीयस्थेप्रसन्नोगुणवत्सलः शत्रुमर्दीनृणांमान्योधनीशस्त्रश्चजायते ७५ सुखेमंदेसुखै
१३ हीनोहृतार्थोवांधवैर्नरः गुणस्वभावोदुःसंगीकुजनैश्चनसंशयः ७६ पुत्रेमंदेपुत्रहीनःक्रियाकीर्तिविवर्जितः हीनकोशोविरूपश्च
मानवोभवतिध्रुवं ७७ शत्रुभावस्थितेमंदेशत्रुहीनोमहाधनी पशुपुत्रयशोयुक्तोनिरोगीजायतेनरः ७८ कलत्रस्थेमित्रपुत्रेसक
लत्रोरुजान्वितः बहुशत्रुर्विवर्णश्चकृशश्चमलिनोभवेत् ७९ क्रोधातुरोष्टमेमंदेदरिद्रोबहुरोगवान् मिथ्याविवादकर्तासाहल
रोगीभवेन्नरः ८० धर्मेमंदेधर्महीनोविवेकीचरिपोर्वशः नृशंसोजायतेलोकःपरदाररतःसदा ८१ कर्मभावेसूर्यपुत्रेकुकर्माधन
वर्जितः दयासत्यगुणैर्हीनश्चंचलोपिभवेत्सदा ८२ छायात्मजेतुलाभस्थेसर्वविद्याविशारदः खरोष्ट्रमहिषैःपूर्णोराजमान्यःशुचि
र्भवेत् ८३ असद्व्ययीव्ययेमंदेकृतघ्नोवित्तवर्जितः बंधुवैरःकुवेषःस्याच्चंचलश्चसदानरः ८४ इतिलग्नादिद्वादशभावगतशनि
फलानि ॥ अथस्त्रीजन्मलग्नविचारः ॥ लग्नेचसप्तमेपापेसप्तमेवत्सरेपतिः म्रियतेचाष्टमेवर्षेचंद्रेषष्ठेष्टमेयदा ८५ गरौशुक्रेमृ ग०
तापत्यामृतगर्भाचमंगले अष्टमस्थोग्रहोनूनंस्त्रियाश्चेतशोभनोनसः ८६ एकःपुत्रोभवेद्राजापंचमस्थोयदारविः मंगलेचत्रयःपु १३
त्रागुरौपंचमकीर्तिताः ८७ पंचमस्थेनिशानाथेस्त्रियाःकन्याद्वयंभवेत् बुधेकन्याश्चतस्रश्चशुक्रेसप्तचकन्यकाः ८८ षडेवकन्या
जायंतेधर्मस्थानेयदासितः सप्तमेचेद्यदाराहुःस्त्रियाःपुनस्तदाभवेत् ८९ सुरूपाभार्गवेलग्नेसाहंकाराधरासुते बुधेवक्रागुरौशुद्धा
शनौदारिद्र्यदुर्भगा ९० पापयोरंतरेलग्नेचंद्रेवायदिकन्यका जायतेचतदाहंतिपितृश्वशुरयोःकुलम् ९१ द्वादशेचाष्टमेभौमेक्रूरे

तत्रैवसंस्थिते लग्नेचसिंहिकापुत्रेरंडाभवतिकन्यका ९२ सप्तमे भार्गवेजाताकुलदोषकरीभवेत् कर्कराशिस्थितेभौमेस्वैरंभ्रमति
वेश्मसु ९३ लग्नात्सप्तमगःपापश्चंद्रात्सप्तमगोपिवा सद्योनिहंतिदंपत्योरेकोनास्त्यत्रसंशयः ९४ लग्नेव्ययेचतुर्थेचपंचमेसप्त
मेग्रहाः पतिवंध्याभवेन्नारीनारीवंध्योभवेत्पतिः ९५ ॥इतिस्त्रीजन्मलग्नाद्ग्रहयोगफलम्॥इतिकाशीनाथकृतौजातकलग्न
चंद्रिकायांग्रहयोगाध्यायः २॥लिखित्वानरचक्रंचयत्रसूर्योव्यवस्थितः तन्नक्षत्रादिकंकृत्वात्रयंदद्याच्चमस्तके ९६ वदनेचत्र
यंदद्यादेकैकंस्कंधयोर्द्वयोः बाहुद्वयेतथैकैकंपाण्योरेकैकमेवच ९७ ऋक्षाणिहृदयेपंचनाभौस्यादेकमेवहि ऋक्षंगुह्येभवेदे
कमेकैकंजानुनोर्द्वयोः ९८ नक्षत्राणिषडन्यानिनिदध्यात्पादयोर्बुधः सूर्यनक्षत्रतोजन्मनक्षत्रावधिगण्यते ९९ मस्तकस्थे
चनक्षत्रेपट्टबंधीभवेन्नरः सुखेमिष्टान्नभोक्तास्यात्स्कंधभेगजवाहनः १००॥५०० बाह्वोर्भेबलवान्मर्त्यःपाणिभेतस्करोभवेत् हृ
दयेचेश्वरोजातोनाभौस्वल्पेनतोषितः १ गुह्यभेपरदारःस्याज्जानुभेपरदेशगः पादस्थितेस्वनक्षत्रेनिर्धनोल्पायुरेवच २ इति
पुंसांसूर्यपुरुषाकृतिचक्रं १ जन्मराशेश्चनक्षत्रान्नक्षत्रंवर्तमानकं गणयेत्क्रमशस्तस्यचंद्रस्यैवशुभाशुभं ३ षडास्ये ६ पृष्ठके षट्कं ६
करेषट्कं ६ त्रयंगुदे ३॥त्रयंपादे ३ त्रयंपीठे ३ दातव्यंगणकोत्तमैः ४ मुखेहानिश्चवित्तस्याधनहानिश्चपृष्ठभे हस्तेराजभयंज्ञेयंराज
मान्यंचगुह्यभे ५ स्थानभ्रष्टोभवेत्पादेकंठेसर्वसुखंभवेत् जन्मनक्षत्रतश्चंद्रनक्षत्रस्यफलंक्रमात् ६ इतिचंद्रडिंभचक्रम् २॥
यस्मिन्नृक्षेभवेद्भौमस्तदादित्रीणिमस्तके त्रयंनेत्रेत्रयंमौलौचतुष्कंबाहुयुग्मके ७ कंठेद्वयंपंचहृदित्रयंगुह्येंऽघ्रितः ४ पदोः सुखे।
रोगंधनंनेत्रयशोमौलौधनंहृदि ८ कंठेहिकारतिर्गुह्येपादेदेशांतरंव्रजेत् वामबाहौभवेद्रोगोदक्षिणेगणकोभवेत् ९ इतिभौ

ल० मनरचक्रम् ३ बुधोयत्रभवेदृक्षेतदादौविलिखेत्क्रमात् मुखेज्ञानायपंचस्तुनेत्रेएकमायपंचच १० पंचकंठेसुखायस्याद्हृदिज्ञानायपं
चं० चच ॥ऋयायपादयोःपंचकरयोर्ज्ञानदंद्वयं ११ एकंगुह्यस्थनक्षत्रंक्षयदंपरिकीर्तितं बुधभाज्जन्मभंयावद्बुधचक्रंविचारयेत् १२
१४ ॥इतिबुधपुरुषाकारचक्रम् ४ मौलौचत्वारिराज्यंयुगपरिगणितंस्कंधयुग्मेचलक्ष्मी रेकंकंठेविभूतिर्मदनपरिमितंवक्षसिश्रीतिला
भः षड्भिःपीडांघ्रियुग्मेजलधिपरिमितंवामबाहौचमृत्यु र्हैकृयुग्मेत्रीणिदद्युर्नृपतिसममुखंवाक्पतेश्चक्रमेतत् १३ इतिगुरुडिंभ
चक्रम् ५ मौलौपंचद्वयंवक्त्रेचतुष्कंहृदयेस्वभात् सप्तबाहौत्रयंगुह्येद्वेजान्वोर्जलधिः४पदे १४ सुखंहृदितथामौलौगुह्येभेमर
णंध्रुवं सुखेसुभोजनंबाहौमृत्युर्जानुपदोर्व्यथा १५ इतिशुक्रडिंभचक्रम् ६ यस्मिन्शनिश्चरतिचक्रगतंतदृक्षाच्चत्वारिदक्षिण
करेंघ्रियुगेभषट्कं चत्वारिवामकरगाम्युदरेचपंचमूर्ध्नित्रयंनयनयोर्द्वितयंगुदेकं १६ सुखस्थितेभानुसुतेतिपीडालक्ष्मीर्यशोद
क्षिणहस्तसंस्थे पादद्वयेनिष्फलताचवामकरेचमृत्युस्तनुसंशयश्च १७ हृद्यर्थोमस्तकेराज्यंनेत्रयोःपरमंसुखं गुदेचप्राणसं
देहःशनिचक्रेविनिर्दिशेत् १८ सुखाच्चरतिगुह्येचगुह्याद्यातिमस्तके मस्तकाल्लोचनेयातिलोचनाद्धृदयंव्रजेत् १९ ॥ रा०
हृदयाद्वामहस्तंचवामहस्तात्पदद्वयं पादाच्चदक्षिणंहस्तंशनिचारोयमुच्यते २० इतिशनिडिंभचक्रम् ७ ॥यस्मिन्नृक्षेभवे १४
द्राहुस्तदादौसप्तपादयोः दक्षिणेचकरेपंचशिरसित्रीणिदापयेत् २१ नक्षत्रेद्वेहृदिन्यस्यमुखेचैकंनियोजयेत् पंचवामक
रेदद्यात्लाभोवैकंनियोजयेत् २२ गुह्यदेशेत्रयंदद्याद्राहुचक्रमिदंस्मृतम् २३ पादयोर्धनहानिःस्यात्संतापोदक्षिणेकरे मा
स्तकेचभयंप्राप्तो हृदयेदुर्जनप्रियः २४ मुखेदुर्जनसंहारोमृत्युर्वामकरेभवेत् नाभिगंसर्वनाशायगुह्येप्राणविनाशनम् २५॥

॥ इति राहुपुरुषाकृतिचक्रम् ॥ ८ ॥ यस्मिन्नृक्षे भवेत्केतुस्तदादौ तु फलं वदेत् नेत्रे द्वे रोगशोकाय मुखे लाभाय पंच च २६ राज्यप्रदं त्रयं ॥
मौलौ नक्षत्रं परिकीर्तितम् चतुष्कं दक्षिणे हस्ते नक्षत्रं च यशप्रदं २७ वामहस्ते चतुष्कं च भयरोगकरं सदा एकं नाभौ च नाशाय गु
ह्ये द्वे मृत्युकारके २८ ऋक्षाणि पादयोः षड् धननाशकराणि वै केतुचक्रस्य माहात्म्यं देहस्थं ज्ञायते बुधैः २९ इति केतुडिंभच
क्रम् ९ मौलौ त्रयं सुखे सप्त स्तनयोरष्ट भानि च हृदि त्रयं त्रयं नाभौ त्रयं गुह्ये च विन्यसेत् ३० मौलौ संतापकृत्तस्य मौ मुखे मिष्टान्न
दो भवेत् स्तनयोः कामदः प्रोक्तो हृदये सुखदः स्त्रियः ३१ नाभौ पतिसुखं दत्ते गुह्ये कामकरः सदा सूर्यडिंभाख्यचक्रं तु स्त्रीणां ॥
प्रोक्तं विशेषतः ३२ इति स्त्रीणां सूर्यपुरुषाकृतिचक्रं १ ऊर्ध्वास्तिस्त्रस्त्रिशूलाग्रा रेखास्तिस्रस्तिरःस्थिताः द्वे द्वे रेखे कोणयो
श्च शृंगयुग्मं तथैकया ३३ मध्यत्रिशूलदंडाधो भानुनक्षत्रमालिखेत् अन्यान्यभिजितासार्धं विलिखेद्दंडमस्तके ३४ अधस्थि
ते त्रिनक्षत्रैरुद्वेगवधबंधनं रेखाष्टके भवेल्लाभः ऋक्षषट्के तथा पुनः ३५ शृंगद्वये रोगभंगौ मृत्युः शूलत्रये स्फुटं विवादे विग्रहे सु
द्वेरोगार्ते गमने तथा ३६ सूर्यकालानलं चक्रं कथितं गणकोत्तमैः ॥ इति सूर्यकालानलचक्रम् ॥ रवेर्वेधे मनस्तापो द्रव्यहानि
र्धरासुते ३७ रोगपीडाकरो मंदो राहुकेतू च मृत्युदौ गुरोर्वेधे भवेल्लाभो रतिलाभश्च भार्गवे ३८ स्त्रीलाभश्चं द्रवेधेन सुखं च बुध
वेधतः जन्मराशेश्च वेधेन फलमेतत्प्रकीर्तितं ३९ इति जन्मराशिवेधफलम् ॥ दुर्गाकारं लिखेच्चक्रं रेखात्रयसमन्वितं ईशा
ने ग्रामनक्षत्रं दत्वा चाभिजिता सह ४० चतुष्कं च चतुष्कं च कोणेषु सकलेषु च मध्ये मध्ये सग्रहं च दद्याद्धिस्त्रयं त्रयं ४१ दुर्गम
ध्ये स्थिते सूर्ये जलशोषः प्रजायते चंद्रे भंगः कुजे दाहो बुधे बुद्धिसुतोन्नपः ४२ बृहस्पतौ दुर्गमध्ये सुभिक्षं प्रचुरं भवेत् चलचि

ल॰ तोन्नपः शुक्रे भेदभंगौ शनैश्चरे ४३ राहुकेतू दुर्गमध्ये विषदग्धो भवेन्नृपः सूर्यः शनैश्चरो भौमो राहुः केतुर्यदा स्थिताः ४४ एते ग्रहा दुर्गम
चं॰ ध्ये दुर्गभंगः प्रजायते गुरुशुक्रौ बुधश्चंद्रो दुर्गमध्ये यदा स्थिताः ४५ तदा दुर्गो न भज्येत महेंद्रेणापि भेदितः ॥ इति दुर्गचक्रम् ॥ मासं
१५ शुक्रबुधादित्याः सपादद्विदिनं शशी भौमस्त्रिपक्षं जीवो वर्षं सार्धवर्षद्वयं शनिः राहुकेतू तदा भुंक्ते सार्धमेकं तु वत्सरम् ४७ इ
तिरव्यादीनां मध्यमचारः ॥ न पश्यति शशी लग्नं लग्नस्वामी न पश्यति न पश्यति यदा सूर्यः सोन्यजातस्तदोच्यते ४८ सुतपतिरस्तग
तो वा पापयुतः पापमध्यगो वा स्यात् संततिबाधां कुरुते केंद्रे वा पापसंयुते चंद्रे ४९ उदयाद्यागतानाड्यस्तासामर्धेन संख्यया सू
र्यर्क्षाच्चद्रुवेहस्संतेन लग्नस्य निर्णयः ५० तिस्रो मीने च मेषे च चतस्रो वृषकुंभयोः मिथुने मकरे पंच पंच चापे च कर्कटे ५१ पंच
सिंहे वृश्चिके च पंच कन्यातुलेपि च योषितोन्येषु लग्नेषु तिस्रः श्रोत्कामनीषिभिः ५२ लग्नेतदीशपार्श्वे वा यावंतस्त्रखयायिनः ॥
धनगा व्ययगाश्चैव तावत्यः सूतिकामताः ५३ चंद्रलग्नांतरस्थैर्वा ग्रहैस्तुल्याश्च सूतिकाः यथा राहुस्तथा शय्या मंगलः क्षेत्रभंगदः ॥
५४ रविस्थाने भवेद्दीपः शनौ लेहं निगद्यते मेषादिद्वादशर्क्षेषु निरावृतिक्रमेण तु ५५ पूर्वादिकं गृहद्वारं जन्मकालान्निगद्यते ॥ रा॰
इति जन्मलग्नज्ञानम् ॥ अथाष्टोत्तरी दशा ॥ चत्वारि भानि यापेषु शुभेषु त्रीणि योजयेत् आर्द्रादिमृगपर्यंतं लिखेदभिजिता सह १५
५७ षडादित्ये च वर्षाणि चंद्रे पंचदशैव तु मंगले चाष्ट वर्षाणि बुधे सप्तदशैव तु ५८ शनौ च दश वर्षाणि जीवे चैकोनविंशतिः राहो
द्वादश वर्षाणि शुक्रे सैका च विंशतिः ५९ जन्मर्क्षगतनाडिघ्नं परासुः स्वगजैर्भजेत् लब्धं परासुयं १०८ शोध्यं शेषमासुः स्फुटं भवेत्
६० परमायुःप्रमाणेन १०८ गुणयेद्गतनाडिकाः नक्षत्रस्य हरेद्भागं नवत्या ९० प्तं विशोधयेत् ६१ आर्द्रा चतुष्कमादित्ये चंद्रे ज्ञेयम्

घाचयं भौमे हस्तचतुष्कं स्यादनूराधात्रिकं बुधे ६२ पूषाचतुष्कं मंदे च धनिष्ठात्रितयं गुरौ राहोर्बुध्ययभचत्वारि कृत्तिकात्रितयं भ
गो ६३ दशादशाहताः कार्या भागो नंदैर्विधीयते अंतर्दशायं तस्यैवमथमं ज्ञायते दशा ६४ ॥ अथ रविमहादशाफलम् ॥ उद्विग्नचि
त्तः परिनष्टवित्तः शरीररोगः स्वजनैर्वियोगः निपीडितो राजजनैः प्रवासी नरोऽश्व घाती ज रवेर्दशायां ६५ अथ रविदशायामंतर्दशाः
॥ सूर्यमहादशायां ६ सूर्यांतर्दशामासाः ४।० सूर्यस्यांतर्गते सूर्ये लाभो राजकुलाद्भवेत् चित्तपीडाव्ययोऽर्थानां विप्रयोगश्च बंधुभिः
६६ रविदशामध्ये ६ चंद्रांतर्दशामादि १०।०।११ शत्रुनाशोऽर्थलाभश्च चिंतानाशः सुखागमः सूर्यस्यांतर्गते चंद्रे व्याधिनाशश्च जा
यते ६७ भौमांतर्दशामासादि ५।१०।०।० मणिमुक्ताकांचनं च जायते च सुखं तथा प्राप्यते भूपतेर्मानः सूर्यस्यांतर्गते कुजे ६८
बुधांतर्दशामासादि ११।१०।००।० विलाससुखदारिद्र्यं जायते रोगसंभवः पामाविचर्चिकादीनि सूर्यस्यांतर्गते बुधे ६९ शा
नेरंतर्दशामासादि ६।२०।०।० राजभीतिः शत्रुभीतिः कलहो दुःखमेव च जायते धननाशश्च सूर्यस्यांतर्गते शनौ ७० गुरुदशा
मासादि १२।००।२०। निःपापो व्यसनैर्हीनो निरोगी धनवानपि प्राप्नोति पदवीं गुर्वीं सूर्यस्यांतर्गते गुरौ ७१ राहुदशामासादि ॥
८।०।०।० व्यसनं वित्तनाशश्च शंकाचाप्यपराजयः द्यूतं बंधुजनैः सार्धं सूर्यस्यांतर्गते त्वगौ ७२ शुक्रांतर्दशामासादि १४।०।०।
ज्वररोगः शिरोरोगो नानापीडा कलेवरे क्वापि बंधुजनैः क्लेशः सूर्यस्यांतर्गते सिते ७३ ॥ अथ चंद्रमहादशा १५ फलम् ॥ गजाश्वरत्ना
नि महाप्रतापो मिष्टान्नपानं विविधं सुखं च अरोगिता सर्वजनानुरागो भवेद्दशायां शशिनो जनस्य ७४ अथ चंद्रांतर्दशाः ॥ चं
द्रमहादशामध्ये १५ चंद्रांतर्दशामासादि २५।०।०।० शोभनस्त्रीसमायोगो वस्त्राभरणसंपदः शुभकन्यासमुत्पत्तिश्चंद्रस्यांतर्गते

ल० तेविधौ ७५ भौमांतर्दशामासादि १३।१०।०।७ अस्कियत्तरुजापीडावह्निचोराद्युपद्रवः कलहः स्त्रीजनैःसार्धंचंद्रस्यांतर्गते कुजे
चं० ७६ बुधांतर्दशामासादि २०।१०।०।० सर्वत्रलभतेलाभंगजवाजिधनादिकं गोमहिष्यादिकंचापिचंद्रस्यांतर्गतेबुधे ७७ श
१६ न्यंतर्दशामासादि १६।२०।०।० उद्वेगोवित्तनाशश्च शोकःप्रान्नूदयाद्धुवं कलहोबंधुवर्गेणचंद्रस्यांतर्गते शनौ ७८ गुरोरंत
र्दशामासादि ३१।२०।०।० धनमार्गादिसंपत्तिर्वस्त्रालंकारभूषणं सर्वत्रलभतेलाभंचन्द्रस्यांतर्गतेगुरौ ७९ राह्वंतर्दशामासा
दि २०।०।०।० रिपुरोगाग्निभीतिश्चबंधुनाशोधनक्षयः भवेदुद्वेगचित्तश्चचंद्रस्यांतर्गतेत्वगौ ८० शुक्रांतर्दशामासादि ३५
।०।०।० उत्तमस्त्रीजनैर्योगोदिव्यकन्यासमुद्भवः धनधान्यादिलाभश्चचंद्रस्यांतर्गतेसिते ८१ रव्यंतर्दशामासादि १०।०।०।०।
लाभोराजकुलेभ्यश्चरोगनाशोरिपुक्षयः जायतेसुखमैश्वर्यंचंद्रस्यांतर्गतेरवौ ८२ अथभौममहादशा ८ शस्त्राभिघातोनृपते
श्चपीडाचोराग्निभीतिश्चधनस्यहानिः कार्याभिघातश्चजनेषुदैन्यंभवेद्दशायांधरणीसुतस्य ८३ अथभौममहादशाया ८ मंत
र्दशाः ॥ भौममहादशामध्येभौमांतर्दशामासादि ७।३।२०।० शत्रुभिःसहसंमर्दोबंधुभिःसहविग्रहः स्त्रीसंगोरक्तपित्ताद्भीर्भौ
मस्यांतर्गतेकुजे ८४ बुधांतर्दशामासादि १५।३।२०।० शत्रुचोरनृपादिभ्योमहाभीतिःप्रजायते महाज्वरहिमैःपीडाभौमस्यांतर्ग ग०
तेबुधे ८५ शन्यंतर्दशामासाद्याः ८।२६।५०।० धनक्षयोमहादुःखंजायतेत्रनिरंतरं सदानरस्यविपदोभौमस्यांतर्गतेशनौ ८६ १६
गुर्वंतर्दशामासाद्याः १६।२६।४।० धनलाभस्तीर्थलाभोदेवब्राह्मणपूजनं नृपात्किंचिद्भवेद्भीतिर्भौमस्यांतर्गतेगुरौ ८७ राह्वंतर्द
शामासाद्याः १०।२०।०।० शस्त्रचोराग्निभीतिःस्यात्कपित्तौधनपीडनं यत्रतत्रभयंभंगोभौमस्यांतर्गतेत्वगौ ८८ शुक्रांतर्दशामा

साद्याः ८।२०।०।० ॥ व्याधयःशत्रुभीतिश्च धननाशोप्युपद्रवः विदेशगमनंनृणांभौमस्यांतर्गतेसिते ८९ रव्यंतर्दशामासाद्याः १०
५।०।० ।आरोग्यंसर्वतोभद्रंराजपूजाजयोत्सवः जायतेत्र धनप्राप्तिर्भौमस्यांतर्गतेरवौ ९० चंद्रांतर्दशामासाद्याः १३।१०।०।० ॥
नानाहृत्तिसमुत्पन्नमणिमुक्तासमृद्धिमान् जायतेमनुजोनित्यंभौमस्यांतर्गतेविधौ ९१ अथबुधमहादशा १७ नानाविधैर
र्थसुखैःसमेतोदिव्यांगनाकेलियुतोविलासी सर्वार्थसिद्धिर्बहुमानितोत्रमहादशायांमनुजोबुधस्य ९२ अथबुधमहाद
शायां १७ अंतर्दशाः ॥ बुधमहादशायांबुधांतर्दशामासाद्याः ३३।३।२०।० बुद्धिःकर्मानुरागश्च मित्रबंधुसमागमः शत्रूद्गमोदे
हपीडाबुधस्यांतर्गतेबुधे ९३ शन्यंतर्दशामासाद्याः १८।२६।४०।० ।अकस्माच्छत्रुसंसर्गोप्यकस्मादर्थसंग्रहः संपर्कोग्निग
रादीनांबुधस्यांतर्गतेशनौ ९४ गुर्वंतर्दशामासाद्याः ३५।२६।४०।० ।स्वर्णादिधातुलाभश्च शरीरारोग्यमेवच संपत्तिर्धर्मलाभ
श्चबुधस्यांतर्गतेगुरौ ९५ राह्वंतर्दशामासाद्याः २२।२०।०।० ।प्रचंडसाहसत्वंचनानाकार्यरणोद्यमः धनधर्मादिलाभश्चबुधस्यां
तर्गतेत्वगौ ९६ भृग्वंतर्दशामासाद्याः ३८।२०।०।० ।गुरुदेवार्चनेप्रीतिर्ज्ञानधर्मरतिस्तथा वस्त्रालंकरणैर्युक्तोबुधस्यांतर्गते
सिते ९७ रव्यंतर्दशामासाद्याः ११।१०।०।० व्याधिशत्रुभयैर्युक्तःपुत्रधर्मधनागमः जायतेराजमान्योत्रबुधस्यांतर्गतेरवौ ९८
चंद्रांतर्दशामासाद्याः २८।१०।०।० ।क्षयरोगोत्रकुष्ठंचनानापीडाकलेवरे गलरोगयुतोलोकोबुधस्यांतर्गतेविधौ ९९ भौमांतर्द
शामासाद्याः ५।३।२०।० ।शिरोरोगीगंडरोगीनानाक्लेशैर्निपीडितः यमभीतिश्चोरभीतिर्बुधस्यांतर्गतेकुजे १०० ॥ ६०० ॥ अथ
शनिमहादशाफलम् ॥ मिथ्यापवादोविमुखोत्रबंधुर्वधोर्थहानिश्च निराशताच कार्याणिशून्यानिसुतादिहानिः क्लेशाभवंत्येव

ल० शनेर्दशायां १ शनिमहादशा १०मध्ये शन्यंतर्दशामासाद्याः ११।३।२०।० शरीरे जायते पीडा पुत्रदारैश्च विग्रहः । विदेशगम
चं० नं हानिः शनेरंतर्गते शनौ २ गुर्वंतर्दशामासाद्याः २१।३।२०।० देवगोब्राह्मणार्चा च पुत्रमित्रधनागमः प्राप्नोति च गुरुस्यानंश
१७ नेरंतर्गते गुरौ ३ राह्वंतर्दशामासाद्याः १३।१०।०।० ज्वरातिसारपीडा च शत्रुभीतिर्धनक्षयः ॥ शस्त्रघातं शरीरे स्याच्छनेरंतर्गते
त्वगौ ४ शुक्रांतर्दशामासाद्याः २३।१०।०।० ॥ जायाधनसुतैर्युक्तो जायते च जयान्वितः ॥ आयुरारोग्यमैश्वर्यं शनेरंतर्गते सिते ॥
रव्यंतर्दशामासाद्याः ६।२०।०।० पुत्रमित्रकलत्राणां हानिश्चार्थस्य जायते संशयो जीवितस्यापि शनेरंतर्गते रवौ ६ चंद्रांतर्दशा।
मासाद्याः १६।२०।०।० गोमहिष्यादिलाभाः सुः स्त्रीलाभो विजयः सुखं जायते कन्यकापत्यं शनेरंतर्गते विधौ ७ भौमांतर्दशामा
साद्याः ८।२६।४०।० देशत्यागो धनत्यागो रोगः शत्रुसमागमः जायते च महाभीतिः शनेरंतर्गते कुजे ८ बुधांतर्दशामासाद्याः ११
।२६।४०।० ॥ धनप्राप्तिश्च बंधुभ्यः सौभाग्यं विजयं सुखं सभायां मान्यता वै द्याच्छनेरंतर्गते बुधे ९ अथ गुरुमहादशाफलम् ॥ धर्मार्थ
कामैः परिपूरितो नरा जमतापैर्विनयैः समेतः धनी जयी दारसुतादियुक्तो गुरोर्दशायां च नरो निरोगी १० अथ गुरुमहादशाया १९ मं
तर्दशाः ॥ गुरुमहादशायां गुर्वंतर्दशामासाद्याः ५०।३।२०।० पुत्रोत्पत्तिर्धनाप्तिश्च सर्वरत्नपरिग्रहः जायते धर्मलाभश्च गुरोरंतर्गते गु
रौ ११ राह्वंतर्दशामासाद्याः २५।१०।०।० विस्फोटकातंकमोहः शोको रोगो धनक्षयः शत्रूणां च भयं विद्याद्गुरोरंतर्गते त्वगौ १२ शुक्रां श०
तर्दशामासाद्याः ४५।१०।०।० कलहो मानसी पीडा वित्तनाशो महाभयं ॥ जायते स्त्रीवियोगश्च गुरोरंतर्गते भृगौ १३ रव्यंतर्दशामासा १०
द्याः १२।२०।०।० निर्भयः शत्रुनाशो च नृपपूजा महत्सुखं प्रचंडैः सह संगश्च गुरोरंतर्गते रवौ १४ चंद्रांतर्दशामासाद्याः ३१।२०।०।० ॥

बहुस्त्रीसंगमक्षीणः शत्रुपीडाविवर्जितः कन्यकापत्यलाभश्च गुरोरंतर्गते विधौ १५ भौमांतर्दशामासाद्याः २६।२६।४०।० रिपुनाशो
धनप्राप्तिः सर्वकार्यसमागमः सुखं सौभाग्यमारोग्यं गुरोरंतर्गते कुजे १६ बुधांतर्दशामासाद्याः ३५।२६।४०।० बुद्धिविज्ञानकौशल्यं
धनबंधुसमागमः गुरुदेवाग्निभक्तिश्च गुरोरंतर्गते बुधे १७ शन्यंतर्दशामासाद्याः २१।३।२०।० वेश्यास्त्री द्यूतमद्येश्च धनधान्या-
दिसंक्षयः जायते लुप्तधर्मो न गुरोरंतर्गते शनौ १८ अथ राहुमहादशाफलम्० स्थानस्य हानिर्गमनं विदेशे धर्मस्य हानिर्विविधा
श्च रोगाः सर्वत्र शून्यं ततु संशयश्च राहोर्दशायां निपतं नरस्य १९ अथ राहुमहादशाया १२ मंतर्दशाः ॥ राहुमहादशायां राहुंतर्द
शामासाद्याः १६।०।०।० । द्विजेंद्रैः सह संसर्गः स्त्रीलाभो धनसंचयः कलहो बंधुभिः सार्धं राहोरंतर्गते त्वगौ २० शुक्रांतर्दशामास
द्याः २०।०।०।० । धार्मिष्ठः सत्यवादी च धनी रोगविवर्जितः जायते राजमान्यश्च राहोरंतर्गते सिते २१ रव्यंतर्दशामासाद्याः ८।०।०
।० । पुत्रदुःखं महाभीतिर्धननाशो मनोव्यथा अग्निचौरभयं चापि राहोरंतर्गते रवौ २२ ॥ चंद्रांतर्दशामासाद्याः २०।०।०।० । स्त्रीनाशो
धननाशश्च कलहो बांधवैः सह महद्भयमवाप्नोति राहोरंतर्गते विधौ २३ भौमांतर्दशामासाद्याः १०।०।०। विषशस्त्राग्निचौरेभ्यो
भयं प्राप्नोति दारुणं संशयो जीवनस्यापि राहोरंतर्गते कुजे २४ बुधांतर्दशामासाद्याः २२।२०।०।० । सुहृद्बंधुजनैर्योगो धनधान्य
सुखागमः न कश्चिज्जायते क्लेशो राहोरंतर्गते बुधे २५ शन्यंतर्दशामासाद्याः १३।१०।०।० स्वदेशस्य परित्यागः कुटुंबैः सह संग
मः भृत्यार्थयोस्तथा नाशो राहोरंतर्गते शनौ २६ गुर्वंतर्दशामासाद्याः २५।१०।०।० रोगहानिर्दुःखनाशो देवब्राह्मणपूजनम् ॥
धनधान्यसमृद्धिश्च राहोरंतर्गते गुरौ २७ अथ शुक्रमहादशाफलम्० ॥ भूपालमान्यो धनधान्यपूर्णो हस्त्यश्वयुक्तः प्रमदानुर

ल० त्तः मंत्रप्रयोगेनिपुणश्च शास्त्रेकवेर्दशायांकुशलीमनुष्यः २८ अथशुक्रांतर्दशाफलानि ॥ शुक्रमहादशायां २१ भृग्वंतर्दशामासाद्याः
चं० ४०।०।०।० मानवृद्धिसुतोत्पत्तिर्धनधान्यागमःसुखं स्वर्णांबरादिलाभोनशुक्रस्यांतर्गतेकवौ २९ रव्यंतर्दशामासाद्याः १२।०।०
१८ ०। शत्रुनाशोजयोनित्यंनृपलाभोमहासुखं प्रचंडैःसहसंसर्गःशुक्रस्यांतर्गतेरवौ ३० चंद्रांतर्दशामासाद्याः २०।०।०।० गुरुदे
वाग्निभक्तोनदुःखमल्पंसुखंतथा शत्रुमित्रजनैर्योगःशुक्रस्यांतर्गतेविधौ ३१ भौमांतर्दशामासाद्याः १४।०।०।० संग्रामे
त्ररिपून्जित्वाधनंकीर्तिश्चलभ्यते आरोग्यंसुखमैश्वर्यंशुक्रस्यांतर्गतेकुजे ३२ बुधांतर्दशामासाद्याः ३४।०।०।० नखरोगः।
शिरोरोगोदुःखमामाशयोद्भवं शरीरेजायतेत्यंतंशुक्रस्यांतर्गतेबुधे ३३ शन्यंतर्दशामासाद्याः ३८।०।०।० वृद्धस्त्रीभिःसं
सर्गःसुखंचार्थागमस्तथा शत्रुनाशःसुहृल्लाभःशुक्रस्यांतर्गतेशनौ ३४ गुर्वंतर्दशामासाद्याः ३२।०।०।० धनधान्यसमृ
द्धिश्चनानाधर्मसुतान्वितः सेनाप्रभुत्वमाप्नोतिभृगोरंतर्गतेगुरौ ३५ राह्वंतर्दशामासाद्याः ३६।०।०।० वैरंविषादोदुःखंच
संदेहोरोगोमहाभयं कदाचित्सुखमाप्नोतिकवेरंतर्गतेत्वगौ ३६ ॥ इत्यष्टोत्तरीदशांतर्दशाफलं ॥ अथविंशोत्तरीदशाः ॥ स्फुट
मासुर्हतंखेटमानेनविभजेत्ततः ॥ परमायुः १२० प्रमाणेनदशाश्चांतर्दशास्मृताः ३७ षडाईद्विस्त्रेदशैं १० दोचसप्तवर्षाणिमंगले ए०
अष्टादशसमा १८ राहौषोडशाब्दाश्चहस्पतौ ३८ एकोनविंशतिर्मंदेबुधेसप्तदशे १७ वतु सप्तवर्षाणिकेतौचविंशतिर्भार्गवे। १८
स्मृताः ३९ कृत्तिकामवधिंकृत्वाभरणींचाधिगण्यते कृत्तिकादिनिराहृत्यास्त्र्यादिर्गणयेत्क्रमात् ४० रविःशशीकुजोराहुर्जीवो
मंदोबुधःशिखी शुक्रोग्निभाद्युफाभादिविश्वर्क्षादिनवेश्वराः ४१ अत्रविंशोत्तर्यामप्यष्टोत्त र्युक्तमहादशांतर्दशाफलानिख्या

दीनांज्ञेयानितत्रकेतुदशायाअभावात्केतुदशांतर्दशाफलानिलिख्यंते॥ अथकेतुमहादशाफलम्॥ लक्ष्मीविनाशोवनितार्थहा
निःशरीरपीडान्वपमानभंगः प्रियैःकुटुंबैश्चभवेद्वियोगःकेतोर्दशायांसततंचतापः ४२ अथकेत्वंतर्दशाफलानि तत्रादौकेतुम
हादशायां ७ केत्वंतर्दशामासाद्याः ४।२७।०।० पुत्रनाशोर्थनाशश्चदुष्टनारीजनैःकलिः राजभीःशत्रुकलहःकेतोरंतर्गतेध्व
जे ४३ शुक्रांतर्दशामासाद्याः १४।०।०।० स्त्रीवियोगोवह्निदाहःकन्याजन्मतथाज्वरः मित्रैःसहैवकलहःकेतोरंतर्गतेभृगौ॥
४४ रव्यंतर्दशामासाद्याः ४।६।०।० अग्निदाहोज्वरोघोरोविदेशगमनंतथा जायतेक्षयरोगश्चकेतोरंतर्गतेरवौ ४५ चंद्रांतर्दशा
मासाद्याः ७।०।०।० अर्थलाभोर्थहानिश्चसुखंदुःखंक्वचित्क्वचित् स्त्रीलाभश्चापिभवतिकेतोरंतर्गतेविधौ ४६ भौमांतर्दशा
मासाद्याः ४।२७।०।० गोत्रजैःसहसंवादोवह्निचौरभयंतथा शरीरेजायतेपीडाकेतोरंतर्गतेकुजे ४७ राह्वंतर्दशामासाद्याः १२।
।१८।०।० चौरभीतिर्देहभंगःकुमित्रैःसहसंगतिः कलहःशत्रुभीःसाकंकेतोरंतर्गतेत्वगौ ४८ गुर्वंतर्दशामासाद्याः ११।६।०।०
राजमान्यैर्जनैर्योगोद्विजेंद्रैश्चसुखागमः भूमिलाभःपुत्रलाभःकेतोरंतर्गतेगुरौ ४९ शन्यंतर्दशामासाद्याः १३।९।०।० वातपि
त्तकृतापीडास्वजनैःसहविग्रहः देहपीडाभवेन्नित्यंकेतोरंतर्गतेशनौ ५० बुधांतर्दशामासाद्याः ११।२७।०।० सुहृद्बंधुसमा
योगोभूनिमित्तंचविग्रहः सदाशरीरपीडास्यात्केतोरंतर्गतेबुधे ५१ अथरव्यादिग्रहमहादशासुकेत्वंतर्दशाफलानि॥ तत्रा
दौरविमहादशायांकेत्वंतर्दशामासाद्याः ४।६।०।० देशत्यागोबंधुनाशोधननाशःसुतक्षयः सर्वत्रैवाशुभंप्रोक्तंसूर्यस्यांतर्गते
ध्वजे ५२ चंद्रमहादशायां १० केत्वंतर्दशामासाद्याः ७।०।०।० चलचित्तोर्थनाशश्चरोगोबंधुजनक्षयः जायतेदुःखमेवात्रचं

ल० द्रस्यांतर्गते ध्वजे ५३ भौममहादशायां ७ केत्वंतर्दशामासाद्याः ४।२७।०।० विषशस्त्राग्निचौरेभ्यो जायते त्र महद्भयी सदा नरः क्लेश
चं० पूर्वभागी भौमस्यांतर्गते ध्वजे ५४ राहुमहादशायां १८ केत्वंतर्दशामासाद्याः १२।१८।०।० ज्वराग्निरिपुशस्त्रेभ्यो मृत्युमायाति सर्वदा
१९ जायते घोरदुःखं च राहोरंतर्गते ध्वजे ५५ गुरुमहादशायां १६ केत्वंतर्दशामासाद्याः ११।६।०।० पुत्रबंधुकृतोद्वेगो निजस्थान
विवर्जितः गुरोरंतर्गते केतौ परिभ्रमणशीलवान् ५६ शनिमहादशायां १९ केत्वंतर्दशामासाद्याः १३।३।०।० रक्तपित्तकृतापी
डा कलहः स्वजनैः सह शनेरंतर्गते केतौ घोरदुःखप्रदर्शनं ५७ अथ बुधमहादशायां केत्वंतर्दशामासाद्याः ११।२७।०।० फलं
शोकदुःखाकुलो नित्यं शरीरे क्लेशसंयुतः भवत्येव न संदेहो बुधस्यांतर्गते ध्वजे ५८ इति बुधमहादशायां १७ केत्वंतर्दशामा
साद्याः ११।२७।०।०।० केतुमहादशाफलं पूर्वमेव लिखितं ॥ अथ केतुमहादशायां ७ केत्वंतर्दशामासाद्याः ४।२७।०।० फलं
लिखितं ॥ अथ शुक्रमहादशायां २० केत्वंतर्दशामासाद्याः १४।०।०।० विदेशभ्रमणं नृणां रोगं मृत्युश्च संभवेत् स्वस्वकोशादि
लाभो ते शुक्रस्यांतर्गते ध्वजे ५९ अथ वर्षदशाः ॥ जन्मलग्नं समारभ्य गतवर्षाणि वर्जयेत् हृतं द्वादशभिः शेषग्रहैर्वाच्यं शु रा०
भाशुभं ॥ ६० ॥ अथ मासदशाः ॥ विंशति २० र्वासराः सूर्ये पंचाश ५० च्च निशाकरे सप्तविंशति २७ रंगारे सप्तपंचाश ५७ दिंदुजे ६१ १९
त्रयस्त्रिंश ३३ च्च मंदे स्यु स्त्रिषष्टि ६३ श्च बृहस्पतौ विंशतिः २० सैंहिकेये च केतोरपि च विंशतिः ६२ सप्तति ७० र्भृगुपुत्रे स्युर्ज्ञेया
मासदशा बुधैः नामराशिं समारभ्य संक्रमावधि गण्यते ६३ अथ दिनदशाः ॥ तिथिवारं च नक्षत्रं नामाक्षरसमन्वितं नवभिस्तु हरेच्छे
षं दिनग्रहदशोच्यते ६४ इति विंशोत्तरीग्रहक्रमेण दिनदशा ॥ अन्यच्च ॥ चैत्रादेर्द्विगुणा मासा गताभिस्तिथिभिर्युताः सप्तभिश्च हरेद्भा

गंशेषाहिनदशाफलं ६५ संपत्तिः कलहो लोकैरानंदः कालकंटकः धर्मस्त्रपश्च विजयोरविवारा क्रमात्फलं ६६ अथक्रूरग्रहमु
भग्रहदशाफलविचारः ॥ क्रूरग्रहदशायांचेत्क्रूरस्यांतर्दशा यदा प्राप्नुयोगे भवेन्मृत्युर्मित्रयोगे च संशयः ६७ मंगलस्य दशायांचेद्बु
नेरंतर्दशायदि म्रियते न चिरंजीवी काकथा स्वल्पजीविनां ६८ क्रूरराशौ स्थितः पापः षष्ठे वा निधने पि वा सितेनरविणाहष्टः स्वपाके
मृत्युदायकः ६९ लग्नस्याधिपतेः शत्रुर्लग्नस्यांतर्दशा यदा करोत्यकस्मान्मरणं सत्याचार्येण भाषितं ७० इति दशारिष्टम्० दशायां
बलवान्खेटः शुभैर्वा सन्निरीक्षितः सौम्याधिमित्रवर्गस्थो रिष्टभंगकरस्तदा ७१ मूलपाकाधिनाथस्य वाचस्पतिदशा यदि बलीशु
भोथविज्ञेयो रिष्टभंगस्तदा बुधैः ७२ शुभग्रहो ग्रहैर्युक्तो विजयी यदि जायते दशायां न भवेत्कष्टं स्वोच्चादिषु च संस्थितः ७३ इति
दशारिष्टभंगाः॥ इति लग्नचंद्रिकायां तृतीयः परिच्छेदः॥३॥ अथ रविद्विग्रहयोगः॥ स्त्रीजितः कूटधर्मा च दुर्विनीतो दयाहढः
विक्रमी लघुचेताश्च सूर्यचंद्रसमागमे ७४ मिथ्यावादी च मूर्खश्च वधनिष्ठावलीनरः तेजस्वी पापचित्तश्च सूर्यभौमसमागमे ७५
विद्वानर्थी राजमान्यः सेवाशीलः प्रियंवदः यशस्वी चास्थिरद्रव्यः सूर्यसौम्यसमागमे ७६ नृपमान्यो धर्मनिष्ठो मित्रवानर्थवानपि
उपाध्यायोतिविख्यातो सूर्यजीवसमागमे ७७ शस्त्रप्रहारो बंधश्च रंगस्तो नेत्रदुर्बलः स्त्रीसंगलब्धद्रव्यश्च शक्तोर्कभृगुसंगमे॥
७८ विद्वानात्मक्रियानिष्ठो गुणज्ञो हृद्द्वचेष्टितः प्रनष्टसुतदारश्च सूर्यमंदसमागमे ७९।१॥ अथ चंद्रद्विग्रहयोगः॥ मच्चर्मधातु
शिल्पी च धनी शूरो रणे भवेत् रक्तपीडातुरो नित्यं चंद्रभौमसमागमे ८० स्त्रीसंमतः सुरूपश्च काव्येतिनिपुणो भवेत् धनी गुणी हा
स्यवक्ताश्चंद्रसौम्यसमागमे ८१ देवद्विजार्चासक्तश्च बंधुमान्यकरो धनी दृढप्रीतिः सुशीलश्च चंद्रजीवसमागमे ८२ कुशली

ल॰ विक्रयादौ च हृद्विजः कलहप्रियः माल्यवस्त्रादिसंयुक्तः शशिभार्गवसंगमे ८३ गजाश्वपालो दुःशीलो हृद्स्त्रीरमणो नरः वेश्याधनोऽम्यपु
चं॰ त्रश्च चंद्रमंदसमागमे ८४ अथ भौमद्विग्रहयोगः॥ स्त्रीदुर्भगः क्रयक्रीतिः स्वर्णलोहप्रकारकः निर्धनो विधवाभर्तो भूपुत्रबुधसंयुतौ ८५
२० मेधावी शीलशास्त्रज्ञः श्रुतिज्ञो वाग्विशारदः अश्वप्रियः प्रधानश्च भौमजीवसमागमे ८६ गुणप्रधानो निपुणो द्यूतेऽन्तरतः शठः परदारर
तो मान्यो भौमशुक्रसमागमे ८७ वाग्मी इंद्रजालदक्षश्च विधर्मी कलहप्रियः विषमद्यप्रपंचाढ्यो भौममंदसमागमे ८८ अथ बुधद्विग्रह
योगः॥ धैर्ययुक्तः पंडितश्च सुखी भवति मानवः नृत्ये वाद्ये च कुशलो बुधजीवसमागमे ८९ धनी सुवाक्यो वेदज्ञो गीते हास्ये च लालसः नं
यज्ञो बहुशिल्पज्ञो बुधशुक्रसमागमे ९० ऋणी गमनशीलश्च निरुपायोऽतिनिष्ठुरः शुभवाक्यः काव्यदक्षो बुधमंदसमागमे ९१ अथ गु
रु द्विग्रहयोगः॥ धर्मस्थितिः प्रमाणज्ञो विद्याजीवी च जायते दिव्यहारो बहुधनो गुरुभार्गवसंगमे ९२ इति सिद्धिश्च मूर्खश्च यशस्वी नग
राधिपः श्रेणीसेनाग्राममुख्यो गुरुमंदान्वये नरः ९३ अथ भृगुद्विग्रहयोगः॥ दारुदारणदक्षश्च क्षाराम्लादिकशिल्पवित् मल्लः पशुपति
मंदवसुः शुक्रसितान्वये ९४ अथ त्रिग्रहयोगाः॥ तत्रादौ रवित्रिग्रहयोगाः॥ भानुभौमबुधैर्योगे स्यात् साहसिको नरः निष्ठुरो गतलज्ज
श्च धनस्त्रीपुत्रपीडितः ९५ सूर्यभौमेज्यसंयोगे प्रचंडः सत्यभाषणः राजमंत्री च निर्दायी वाक्ये च निपुणो भवेत् ९६ सूर्यारशुक्रसंयोगे सुभ रा॰
गो भजनातुरः कुलीनो वत्सलो लोके विषयासक्तमानसः ९७ सूर्यारशनिसंयोगे मूर्खो रोगी धनवर्जितः रोगार्तः स्वजनैर्हीनो विकलः क २०
लहाकुलः ९८ सूर्यसौम्येज्यसंयोगे नेत्ररोगी महाधनः शास्त्रशिल्पकलाभिज्ञो लिपिकर्ता भवेन्नरः ९९ सूर्यज्ञशुक्रसंयोगे गुरुवर्गेनि
रहतः अभिशस्तो द्विशोऽयाति स्त्रीहेतोस्तप्तमानसः १००॥७०० सूर्यज्ञशनिभिर्योगे दुराचारः पराजितः बंधुभिश्च परित्यक्तो विद्वेषी जा

यतेनरः १ सूर्येज्य भृगुसंयोगे राजमंत्री च निर्धनः दुष्टचक्षुर्भवेत्क्रूरः आत्तश्च परकर्मकृत् २ सूर्येज्यशनिभिर्योगे पुत्रमित्रकलत्रवान् निर्भयो
नृपनिष्टश्च द्वेष्यो बंधुजनस्य च ३ सूर्यशुक्रार्किसंयोगे कलामानविवर्जितः कुष्ठी शत्रुजयी द्विष्टो दुराचारी भवेन्नरः ४ चंद्रारबुधसंयो
गे त्वनाचारी च पापकृत् आजीवितादयो लोके बंधुहीनश्च जायते ५ चंद्रभौमेज्यसंयोगे स्त्रीलोलो व्रणसंयुतः कांतश्च संमतः स्त्रीणां चं
द्रतुल्यमुखो भवेत् ६ चंद्रारभृगुसंयोगे दुःशीलायाः पतिः सुतः सदाभ्रमणशीलश्च शीतभीतोपि जायते ७ चंद्रारशनिभिर्योगे बा
ल्ये च मृतमातृकः क्षुद्रश्च लोकविद्विष्टो विषमो जायते नरः ८ चंद्रज्ञजीवैः संयोगे यशस्वी धनवानपि पुत्रमित्रादिसंयुक्तो वाग्मी
स्यात्तश्च कीर्तिमान् ९ चंद्रज्ञभार्गवैर्योगे विद्यया संयुतो नरः सेर्ष्यो धनातिलोभी च नीचाचारश्च जायते १० चंद्रज्ञशनिभिर्योगे प्राज्ञो
भूपतिपूजितः अत्युच्चो विपुलांगश्च वाग्मी भवति मानवः ११ चंद्रेज्यशुक्रैः संयोगे साध्वीपुत्रश्च पंडितः साधुः सर्वकलाभिज्ञः सुभगो
जायते नरः १२ चंद्रेज्यशनिभिर्योगे नीरोगः स्त्रीरतो नरः शास्त्रार्थविज्ञो नीतिज्ञो ग्रामपत्तनपालकः १३ चंद्रशुक्रार्किभिर्योगे लिपिक
र्ता च वेदवित् पुरोहितकुलोत्पत्तिर्भवेत्पुस्तकवाचकः १४ भौमज्ञजीवैः संयोगे सुकविर्युवतीपतिः परोपकारकर्ता च गांधर्वे कुशलो
नरः १५ भौमज्ञभृगुभिर्योगे विकलांगश्च चंचलः अकुलीनः सदोत्साही हृष्टश्च मुखरो नरः १६ कुजज्ञशनिभिर्योगे प्रवासी नेत्ररोगवान्
प्रेष्यो वदनरोगी च हास्यलुब्धो भवेन्नरः १७ कुजेज्यभृगुभिर्योगे दिव्यनारीयुतः सुखी सर्वानंदकरो लोके जायते नृपतिप्रियः १८ भौम
जीवार्किभिर्योगे क्षतांगो राजसंमतः नीचाचारो निर्घृणश्च भवेन्मित्रैर्विगर्हितः १९ कुजशुक्रार्किसंयोगे दुःशीलायाः पतिः सुतः प्रवास
शीलो दुःखी च जायते जातकः सदा २० बुधेज्यभृगुसंयोगे सुतनुर्नृपपूजितः क्षतारिर्दीर्घकीर्तिश्च सत्यवादी भवेन्नरः २१ बुधजीवा

ल० किसंयोगेसुदारोबहुभोगवान् धनैश्वर्ययुतःप्रायःसुखधैर्ययुतोभवेत् २२ बुधशुक्रार्किभिर्योगेमुखरःपरदारकः असंगत्यकलाभिज्ञःस्वदे
बं० शनिरतोजनः २३ गुरुशुक्रार्किभिर्योगेराजाभवतिकीर्तिमान् नीचवंशेपिसंभूतःशीलयुक्तोनृपोत्तमः २४ प्रायःपापैर्युतेचंद्रेमातुर्नाशो
२१ रवौपितुः शुभग्रहैःशुभंवाच्यंमिश्रैर्मिश्रंफलंवदेत् २५ शुभास्त्रयोग्रहायुक्ताःकुर्वंतिसुखिनंनरं पापास्त्रयोदुःखितंचदुर्विनीतंविमहि
तं २६ ॥इतित्रिग्रहपरिच्छेदः॥ अर्केन्दुकुजसौम्यानांयोगेलिपिकरोभवेत् तस्करोमुखरोवाग्मीमायायांकुशलोभिषक् २७ सूर्येन्दुकु
जजीवानांसंयोगेनिपुणोधनी तेजस्वीगतशोकश्चनीतिज्ञश्चभवेन्नरः २८ रवींदुभौमशुक्राणांयोगेविद्यार्थसंग्रही सुखीपुत्रीकलत्री
चवाग्वृत्तिर्मनुजोभवेत् २९ अर्केन्दुकुजमंदानांयोगेमूर्खश्चनिर्धनः ह्रस्वोविषमदेहश्चभिक्षावृत्तिर्भवेन्नरः ३० अर्केन्दुबुधजीवानां
योगेशिल्पकरोधनी सौवर्णिकःश्रुताक्षश्चरोगहीनश्चजायते ३१ रविचन्द्रज्ञशुक्राणांसंयोगेसुभगोनरः धैर्यस्वैराज्यमान्यश्चवाग्मीच
विकलोनरः ३२ रविचंद्रज्ञमंदानांयोगेभिक्षाशनोनरः वियुक्तःपितृमातृभ्यांविकलाक्षश्चनिर्धनः ३३ सूर्यचंद्रेज्यशुक्राणांसंबंधेराजपू
जितः जलारण्यमृगस्वामीनरःस्यान्निपुणःसुखी ३४ सूर्यचन्द्रेज्यमंदानांमान्यश्चवनिताप्रियः बहुवित्तसुतस्त्रीस्वःसमाक्षश्चप्रजाय
ते ३५ रवींदुज्ञसुमंदानांयोगेचात्यंतदुर्बलः वनितासहशाचारोभीरुरग्रसरोनरः ३६ अर्कभौमबुधेज्यानांयोगेसूत्रकरोनरः परदाररतः ग०
शूरोदुःखीचक्रधरोभवेत् ३७ रवींदुकुजशुक्राणांसंयोगेपारदारिकः निर्लज्जोदुर्जनश्चौरोविषमांगोजनोभवेत् ३८ रविभौमबुधार्की २१
णांयोगेयोद्धाकविर्जनः मंत्रीचभूपतिस्त्रीघ्नोनीचाचारश्चजायते ३९ रविभौमेज्यशुक्राणांयोगेपूज्योधनीजयः सुभगोनृपमान्यश्चख्या
तोभवतिनीतिभाक् ४० रविभौमेज्यमंदानांसंयोगेगणनायकः सोन्मादोनृपमान्यश्चशिक्षार्थीजायतेनरः ४१ रविभौमसितार्कीणांसंयो

गेजायतेनरः लोकद्वेष्टासमास्नम्रनीचाचारोजडाकृतिः ४२ रविज्ञजीवशुक्राणांयोगेबहुमतिर्नरः धनीसुखीचसिद्धार्थःप्रहृष्टश्चप्रजाय
ते ४३ सूर्येज्ञगुरुमंदानांसंयोगेजायतेनरः भ्रातृमान्कलहीमानीक्लीबाचारीनिरुद्यमः ४४ रविज्ञभृगुमंदानांयोगेमिन्नसुतःसुचि॥
सुखरःसुभगःप्राज्ञोजायतेचसुखीनरः ४५ रवीज्यभृगुमंदानांसंयोगेलोभमानवान् कविःकारुकनाथश्चराजप्रीतोभवेन्नरः ४६ चं
द्रारबुधजीवानांयोगेशास्त्रविचक्षणः नरेंद्रस्यकृपापात्रोमहाबुद्धिर्नरोभवेत् ४७ चन्द्रभौमज्ञशुक्राणामन्वयेबंधकीपतिः निद्रालुःक
लहीनीचोबंधुद्वेषीजनोभवेत् ४८ चंद्रभौमज्ञमंदानांयोगेशूरःकुलोद्भवः पुत्रमित्रकलत्रीचहीमातृपितृकोजनः ४९ चंद्रारगुरुशुक्रा
णांयोगेसाहसिकोनरः विकलांगोधनीपुत्रीमानीप्राज्ञोपिजायते ५० चंद्रारजीवमंदानांसंयोगेबधिरोधनी सोन्मादःस्थिरवाक्यश्चशू
रोचित्रोभवेन्नरः ५१ चंद्रारभृगुमंदानांमिलनेकुलटापतिः सोद्वेगःसर्पतुल्याक्षःप्रगल्भोजायतेनरः ५२ चंद्रज्ञजीवशुक्राणांमिलनेसु
भगोधनी हीमातृपितृकःप्राज्ञोगतारिर्जायतेनरः ५३ चंद्रज्ञगुरुमंदानांयोगेबंधुप्रियःकविः तेजस्वीराजमंत्रीचयशोधर्मयुतोनरः॥
५४ इंदुज्ञभृगुमंदानांयोगेमात्राविवर्जितः लब्धदोषीसुभगोदुःखीबहुभार्योभवेन्नरः ५५ चंद्रेज्यसितसौरीणामन्वयेपारदारिकः प्राज्ञो
निर्द्रव्यबंधुश्चस्थूलभार्योभवेन्नरः ५६ भौमज्ञगुरुशुक्राणांयोगेस्त्रीकलहप्रियः धनीसुशीलोनीरोगीलोकपूज्योभवेन्नरः ५७ भौ
मज्ञगुरुसौरीणांयोगेशूरश्चनिर्धनः सत्यशौचयुतोविद्वान्वादीवाग्मीनरोभवेत् ५८ भौमज्ञभृगुमंदानांसारमेयरुचिर्भवेत् महो
न्यपुष्टोयोद्धाचदृढांगोजायतेनरः ५९ भौमेज्यभृगुमंदानांमिलनेसाहसप्रियः धनीसतेजाःस्त्रीलोलःकितवोजायतेनरः ६० बुधे
ज्यभृगुमंदानांयोगेकामातुरोजनः विधेयभृत्योमेधावीतीव्रशास्त्ररतोभवेत् ६१ ॥ इतिचतुर्ग्रहयोगपरिच्छेदः॥ बहुप्रपंचोदुःखी

ल० च जायाविरहतापितः सूर्याद्येर्जीवपर्यंतैर्नरः स्यात्पंचभिर्ग्रहैः ६२ गत सत्त्वो बंधुहीनः परकर्मकरो नरः क्लीवस्य च सखा सूर्यचंद्रारबुधभा
चं० र्गवैः ६३ अल्पायुर्विकलश्च दुःखी सुतविवर्जितः रवींदुभौमज्ञार्कीणां योगे बंधनभागपि ६४ जातसंघो बहुदुःखी च पितृमातृविवर्जितः
२२ गानभीतो नरो भानुचंद्रारगुरुभार्गवैः ६५ परद्रव्यहरो योद्धा परतापकरः खलः समर्थो जायते सूर्यचंद्रारगुरुसौरिभिः ६६ मानाचारधनै
र्हीनः परदाररतो नरः एकस्थैर्जायते भानुचंद्रारभृगुसौरिभिः ६७ राजमंत्री भूरिवित्तो यंत्रज्ञो दंडनायकः ख्यातो जनो यशस्वी च रवींदुज्ञेज्य
भार्गवैः ६८ परान्नभोजी सोन्मादः प्रियतमश्च वंचकः उग्रो भीरुर्नरः सूर्यचंद्रज्ञगुरुसौरिभिः ६९ धनपुत्रसुखैर्हीनो भ्रसूत्ताहीचलोमशः
दीर्घो भवति सूर्येन्दुबुधशुक्रशनैश्चरैः ७० तंद्राजलरतो वाग्मी चलचित्तो गनाप्रियः प्रायशः शत्रुभिर्भीतो रवीद्वीज्यसितासितैः ७१
स्फीतो बहुहयः कामी नरो शोकश्च भूपतिः सूर्यारज्ञेज्यशुक्राणां योगे भूपतिवल्लभः ७२ भिक्षाभोगी च रोगी च निस्पाद्द्रोगी मलीमसः जी
र्णो नरो भानुभौमज्ञजीवशनिभिर्भवेत् ७३ व्याधिभिः शत्रुभिर्ग्रस्तः स्थानभ्रष्टो बुभुक्षितः नरः स्याद्विकलः सूर्यकुजज्ञभृगुसौरिभिः
७४ विज्ञो विचारदेहे च धातुयंत्ररसायने नरः प्रसिद्धो रव्यारगुरुशुक्रार्किभिर्युतैः ७५ मित्रप्रियः शास्त्रवेत्ता धार्मिको गुरुसंमतः दया
लुः सूर्यसौम्येज्यभृगुपुत्रशनैश्चरैः ७६ साधुः कल्मषहीनश्च धनविद्यासुखान्वितः बहुमित्रो नरश्चंद्रभौमज्ञगुरुभार्गवैः ७७ पा रा०
रान्नपाचको निःस्वो मलिनस्तिमिरामयी नरो भवति चंद्रारजीवशुक्रशनैश्चरैः ७८ बहुमित्रारिपक्षश्च दुःशीलः परपीडकः मा २२
नी नरश्चंद्रभौमबुधशुक्रशनैश्चरैः ७९ दुर्भगो मलिनो मूर्खः प्रेष्यः क्लीवश्च निर्धनः नरो भवति चंद्रारगुरुशुक्रशनैश्चरैः ८० राज
मंत्री राजतुल्यो लोकपूज्यो गणाधिपः चंद्रज्ञगुरुशुक्रार्कियोगे जातो भवेन्नरः ८१ अशोकस्तामसो निःस्वः सोन्मादो राजवल्लभः

निद्रालुरेभौमबुधजीव शुक्रशनैश्चरैः ८२ इतिपंचग्रहयोगपरिच्छेदः॥ विद्याधर्मधनैर्युक्तोबहुभाषीचभाग्यवान् सूर्याद्यैःशुक्रपर्यंतै
र्लोभोभवतिषड्ग्रहैः ८३ परकार्यरतोदाताशुद्धात्माचंचलाकृतिः षड्भिर्ग्रहैर्विनाशुक्रेरमतेविजनेजनः ८४ संशयीसुभगोमानीख्या
तोसुहृदेरिमर्दकः विनाजीवंग्रहैःषड्भिर्वनादौरमतेजनः ८५ अर्थप्रियोरणोत्साहीपिशुनःक्रोधलोभवान् अर्केन्दुभौमजीवास्फुजिन्मंदैः
सुभगोनरः ८६ कलत्रहीनोनिर्द्रव्योराजमंत्रीक्षमायुतः रवीन्दुबुधजीवास्फुजिन्मंदैःसुभगोनरः ८७ धनदारसुतैर्हीनस्तीर्थगामी
वनाश्रितः सूर्यारेन्दुज्यशुक्रार्कपुत्रैर्योगेभवेन्नरः ८८ धनीपुत्रीसुचिर्मंत्रीबहुभार्योन्नपप्रियः विनासूर्यंग्रहैःषड्भिःमतापीजाय
तेनरः ८९ परदाररतःकुष्ठीस्थानभ्रष्टोनिराकृतः मूर्खश्चोरश्चसूर्येन्दुभौमज्ञभृगुसौरिभिः ९० परकर्मकरोनीचोहृद्रोगीश्वासकास
वान् निंद्योनरःसूर्यसोमभौमजीवसितासितैः ९१ प्रायोदरिद्रोमूर्खश्चषड्भिर्वापंचभिर्ग्रहैः अन्योन्यदर्शनात्तेषांफलमेतत्प्रकीर्तितं ९२
इतिषड्ग्रहयोगपरिच्छेदः॥लग्नात्सप्तमपर्यंतंग्रहैःसर्वैःशुभाशुभैः क्रमेणसंस्थितैःप्रोक्तोयोगोनौकाभिधोबुधैः ९३ अन्योपजीवि
विभवोबह्वायुःख्यातकीर्त्तिमान् कृपणोमलिनोलुब्धोनौयोगेचंचलोनरः ९४ चतुर्थात्कर्मपर्यंतैःक्रमेणपतितैर्ग्रहैः विख्यातःकूटना
मासौयोगःप्रोक्तोमनीषिभिः ९५ मिथ्यावादीशठःक्रूरःकितवोबंधुपालकः निष्किंचनःशैलवासीकूटयोगभवोनरः ९६ सप्तमाल्लग्न
पर्यंतैःखेटैःसर्वैःशुभाशुभैः छत्रयोगःसमाख्यातोब्रह्मरुद्रादिभिःसुरैः ९७ महत्त्वधीर्दयालुश्चदीर्घायुःस्वजनाश्रयः वयस्तिप्रथमे
सेचसुखीछत्रप्रियोनरः ९८ दशमाच्चचतुर्थांतैर्गगनेन्द्रैःशुभाशुभैः गतैर्योगःकार्मुकाख्यःख्यातोसौपंडितोत्तमैः ९९ वयोमध्येभाग्य
हीनोगुप्तिपालोवनेरतः मिथ्यावादीचचोरश्चकार्मुकीजायतेनरः १००॥ ८०० लग्नात्सप्तग्रहैःसौम्यैःपापैश्चसुखकर्मगैः वज्रःस्या

लं० द्विपरीतस्थैर्यवःपद्मंचमिश्रितैः १ सुखीचसुभगः शूरोमध्येभाग्येनवर्जितः निःस्नेहश्चविरूढश्चवज्रयोगेखलोनरः २ दाताचस्थिरचि
चं० तश्चव्रतादिनियमैर्युतः मध्येसुखार्थपुण्याढ्योयवयोगेजनोभवेत् ३ स्थिरायुर्दीर्घकीर्तिश्चकांतःशुभशतैर्युतः भूयोगुणमदैर्युक्तः
२३ पद्मयोगेजनोभवेत् ४ लग्नाद्द्वितीयगैःसर्वैर्ग्रहैर्वापिप्रकीर्तिता शकटंवाचास्तलग्नस्थैर्विहगैःसुखकर्मगैः ५ निपुणोनिधिकार्येषुस्थि
रद्रव्यःसुखैर्युतः प्रहृष्टसुखनेत्रश्चतृष्णावाप्यांनरःसदा ६ मूर्खःकुभार्योरोगार्तःशाकटश्रान्तजीविकः निःस्वोबंधुविहीनश्चशाकटेजा
यतेनरः ७ भ्रमणेतिरुचिर्हृष्टःसुरतप्राप्तजीविकः निकृष्टःकलहप्रीतोविहंगेमानवोभवेत् ८ केंद्रस्थानद्वितीयस्थैर्ग्रहैर्जलधिरुच्य
ते कंटकेभ्यस्तृतीयस्थैश्चकंसर्वैर्ग्रहैःस्मृतं ९ बहर्थरत्नसंपन्नःपुत्रीभोगीजनप्रियः सुशीलःस्थिरचित्तश्चजलधौजायतेनरः १० ॥
प्रणताशेषभूपालःसतसेवितपदांबुजः चक्रयोगेसमुत्पन्नोमहाराजोभवेन्नरः ११ धनस्थानेत्रिकोणेचग्रहैःसर्वैर्हलंस्मृतं लग्नत्रिको
णगैःखेटैःशृंगाटकमुदाहृतं १२ बह्वाशीचदरिद्रीचकर्षकोबंधुवर्जितः क्षोद्वेगोदुःखितःप्रेष्योहलयोगभवोनरः १३ हास्यवक्ताशु
भाचारोन्रपभीतःकलिप्रियः धनाढ्योयुवतिप्रेष्योयोगेशृंगाटकेनरः १४ लग्नमारभ्यकेन्द्रेषुद्वितीयस्थैश्चतुर्ग्रहैः यूपवाणौशक्तिदं
डौचत्वारोमीस्मृताबुधैः १५ आत्मरक्षारतस्त्यागीसुखसत्यव्रतैर्युतः विशिष्टोमंत्रवादीचयूपयोगनरोभवेत् १६ शरकर्त्तादस्युसेवीमांसा रा०
दोमृगवंधनः हिंसकःशिल्पकारीचशरयोगोद्भवोभवेत् १७ चिरायुर्सुहृदक्षश्चसुभगःसुस्थिरोलसः नीचोदुःखीदरिद्रश्चशक्तियो २३
गेभवेन्नरः १८ निःस्वोनष्टसुतस्त्रीकोबंधुनाशःसुनिर्घृणः नीचप्रेष्योदुःखितश्चदंडयोगेभवेन्नरः १९ केंद्रात्द्वितीयस्थानस्थैःसप्त
नक्षगतैर्ग्रहैः अर्धचंद्रोगदाप्रोक्ताकेंद्रात्पार्श्वद्वय स्थितैः २० बलीराजप्रियःकांतोहेमरत्नैरलंकृतः अर्द्धचंद्रेचमूनाथःसुभगो।

जायतेजनः २१ शास्त्रेयोगेप्रवीणश्चसद्योयुक्तार्थतत्परः॥यज्वाधनीसुप्रसन्नोगदायोगोद्भवोनरः २२ एकराशिस्थितैर्लग्नाद्गृहैर्गोलोयुगःक्रमा
त् शूलकेदारपाशाश्चदामनोवीणयासह २३ विद्याहीनोधनैर्हीनोमानहीनोतिदुखितः गोलयोगेसमुत्पन्नोमलिनोजायतेनरः २४ पाखंडभा
ग्योनिर्द्रव्यःपुत्रमातृविवर्जितः युगयोगेधर्महीनोलोकनिंद्योपिजायते २५ तीक्ष्णोलसोनिर्धनश्चहिंस्त्रः शूरोवहिःकृतः संग्रामलब्धप्र
बद्धश्चशूलयोगेजनोभवेत् २६ कृषीरतःसत्यवादीस्ववाहुविहितोद्यमः धनीसुखीचंचलात्माकेदारोत्थोनरोभवेत् २७ कार्यदक्षःप्रपंची
चवहुभाषीचवंधुभाक् विशीलोवहुलक्ष्मीकोपारंभस्त्ययुतोभवेत् २८ उपकारीधनीमूढःपशुपुत्रसमन्वितः दामयोगभवोलोकोरत्नै
र्भवोतिपूरितः २९ नृत्यगीतप्रियोनेतावहुभृत्योधनीसुखी कार्येषुनिपुणोलोकोवीणायोगेचजायते ३० द्विस्वभावेस्थिरेरवेटैश्चरेच
सकलैःस्थितैः नलोथमुसलोरज्जुर्योगाःप्रोक्ताःपुरातनैः ३१ न्यूनातिरिक्तदेहश्चनिपुणोधनसंचयी वंधुप्रियःसुरूपश्चनला
योगेभवेन्नरः ३२ राजमानधनैर्युक्तःख्यातःपुत्रीनृपप्रियः मुसलेस्थिरचित्तश्चकर्मोद्युक्तश्चजायते ३३ परदेशद्रव्यभागीसुरूपोद्य
नतत्परः क्रूरःखलस्वभावश्चरज्जुयोगेजनोभवेत् ३४ केंद्रस्थानेषुसर्वेषुग्रहैःसर्वैश्चसंस्थितैः मालायोगःसर्वपापैःसर्पयोगःप्रकीर्तितः॥
वस्त्रवाहार्थभोगाद्यैर्युक्तःकांतासुहृत्प्रियः मालायोगेसमुत्पन्नःसुखीभवतिसर्वदा ३६ क्रूरोनिःस्वोदुखितश्चपरान्नेनिरतःसदा दीनश्चवि
षमोलोकःसर्पयोगेप्रजायते ३७॥इतिनाभसयोगाः॥शाकंवह्नि३गुणंकृत्वामुनिभि७र्भागमाहरेत् शेषंनेत्र२गुणंकृत्वापंचपंच५नियो
जयेत् ३८ लब्धंवह्नि३गुणंकृत्वाधान्यादिःसप्तभागतः शून्येपंचैवविज्ञेयाःसर्वमेवनिरूपयेत् ३९ वर्षाधान्यंतृणंशीतमुष्णंवायुश्चवृ
ष्ट्यः॥क्षयश्चविग्रहश्चैवज्ञेयमेवंक्रमेणच ४० शाकंशक्र१४गुणंकृत्वाभागोवेदैर्विधीयते॥शेषेमेघाभवंतीहचाव ॥

ल० लोचायथाक्रमं ४० आवर्तैश्चिंतितावृष्टिः समावर्तेन्दुपूरतः पुष्करे दुष्करावृष्टिर्द्रोणो वर्षति सर्वदा ४१ दशभिर्दिवसैर्मासो मासश्च
चं० तुष्केण लभ्यते दिवसः दिवसद्वयेन घटिका घटिकायुग्मेन पलमेकं तु ४२ ध्रुवांकः ध्रुवांको दशया गुण्यो भानुना १२ त्रिंशता पि च प
२५ ष्टिभिः ६० ग्रहे द्वागंदशाः सूर्यादितो भवेत् ४३ आदित्यस्त्रिगुणो राहुः सूर्ये चन्द्रयुतो गुरुः आदित्यद्विगुणं भौमे मेलयित्वा शनिर्भवे
त् ४४ चंद्रभौमौ बुधो १७ ज्ञेयः केतुस्तु मंगलो ७ यथा चंद्रमा द्विगुणः २० शुक्रो दशाचक्रमुदाहृतं ४५ नक्षत्रभुक्ता घटिकास्तु षष्ठ्या
विपन्नवाप्ताः शरदो वशिष्टं निहंति सूर्येण १२ तथैव मासं तथाखरामेण ३० दिनानि शेषात् ४६ तथैव षष्ठ्या ६० घटिकाः पलानि वि
शोधयेदायुषितत्र शेषं आयुर्दशाभिस्त्रदशाहता चेदंतर्दशास्यान्नवभिस्त्रहै भा२१गैः ४७ चंद्रकालानलं चक्रं व्योमाकारं लिखे
द्बुधः चतुर्दिक्षु त्रिशूलानि मध्यभिन्नानि कारयेत् ४८ पूर्वत्रिशूलमध्यस्थं चंद्रभं च लिखेद्बुधः अन्यान्यभिजितासार्धं नक्षत्राणि
लिखेत्क्रमात् ४९ नामभं च स्थितं यत्र तत्र ज्ञेयं शुभाशुभं त्रिशूले तु भवेन्मृत्युर्मध्यमं बहिरष्टके ५० लाभं क्षेमं जयं प्रस्तां चंद्रगर्भाष्टको
भवेत् मूले मध्ये च गर्भे च फलं ज्ञेयं त्रिधा बुधैः ५१ लाभालाभौ सुखं दुःखं जयं चैव पराजयं चंद्रकालानले चक्रे नित्यमेव विचार
येत् ५२ ॥इति दिनचंद्रकालानलचक्रं॥ नवोर्ध्वगानि धिष्ण्यानि नव तिर्यग्गतानि च अधोगतानि धिष्ण्यानि नव चैव लिखेद्बुधः प०
५३ चतुर्नाडीकृते वेधे सव्यक्रमत्रयं स्फुटं सर्पाकारस्य चक्रस्य कालचक्रं प्रजायते ॥५४ मुखमध्ये त्रयं धिष्ण्यं स्थितं कालमुखं विदुः २५
धिष्ण्यद्वयं च कोणस्थं कालदंष्ट्राद्वयं मतं ५५ दिनर्क्षमादितः कृत्वा जन्मर्क्षं यत्र संस्थितं मुखदंष्ट्रागते मृत्युः शुभमन्यत्र संस्थिते ५६ ज्वरि
ते नष्टदृष्टे च विवादे विग्रहे रणे मुखदंष्ट्रागतं नाम यस्य तस्य महद्भयं ५७ इति यमदंष्ट्राचक्रम्० पूर्णाधनैः परिजनैः सुतदारकोशैः स्खंडप

तापनिकरे विजितारिपक्षः कोपाकुलो निजजनैः परिपूर्णमानस्तुंगस्थिते दिनकरे भवतीह लोकः ५८ दाताभोक्ता मनुरसुवतीनायको विश्व
बंधुर्नानाक्रीडापरिणतमतिर्भूवलात्मस्वभावः पुत्रैः पौत्रैर्हयगजरथैः पूर्णगेहो विलासी चंद्रे तुंगे भवति मनुजो लोकमान्यः प्रसन्नः ५९ चं
डप्रतापवशिताखिललोकपालः शास्त्रप्रहारनिपुणो धनधान्यपूर्णः रक्ताधिकोरणधरासुपुरःप्रयातो तुंगस्थिते क्षितिसुते मनुजः प्रता
पी ६० अध्यापकः शुभमतिर्नृपतिप्रधान्यो लोकोत्तरातिविभवो गुणवानुदारः सत्कीर्तिभाक्सुतनयो निरुजः सुमित्रस्तुंगे बुधे भवति स
र्वजनोपकारी ६१ भूमंडलीपतिरुदारमतिस्त्रदाता ब्रह्मात्मवोधविमलो बहुपुत्रपौत्रः तीर्थानुरागहृदयो दृढदेहबंधुस्तुंगे गुरौ न
रपतिर्धनवानुदारः ६२ देशाधिपो दृढमतिः सुतनुः सुमंत्री यो हा समस्तजनपालनलब्धकीर्तिः चौरादिशासनपरः सुकविः सु
बुद्धिस्तुंगे कवौ कुलपतिर्मनुजोतिहृष्टः ६३ आसागरं क्षितिपतिर्दृढदेहबंधो हिंसारतो रणभुवि प्रथितप्रभावः हस्त्यश्वरत्नमणि
भिः परिपूर्णगेहः सूर्यात्मजे भवति तुंगगते मनुष्यः ६४ भवंति धरणिपालो नीचजातेः प्रतापी हयगजधनयुक्तो जालिवर्गैर्विरक्तः
॥ कुटिलमतिरनीतिर्भूरिभांडारयुक्तस्तमसि मिथुनसंस्थे जायते मानवेंद्रः ६५ इति रव्यादीनां परमोच्चगतफलम् ० दशांशे १० के
शशी त्र्यंशे भौमोष्टाविंशके तथा बुधः पंचदशांशे च पंचमांशे बृहस्पतिः ६६ सप्तविंशांशके शुक्रो विंशत्यंशे शनैश्चरः सैंहिके
यस्त्रिंशांशे परमोच्चं प्रकीर्तितम् ६७ इति रव्यादिग्रहाणां परमोच्चांशाः ॥ ॥ इति सर्वशास्त्रविशारदश्रीकाशीनाथकृतो जा
तकलग्नचंद्रिका सम्पूर्णा ॥ ॥ समाप्तम् ॥ ॥ श्रीगणेशाय नमः ॥ अथ जीवयोगः ॥ ॥ चंद्रात्सप्तमगो जीवो ह्यथवा जीवसं
युतः जीवयोगं विजानीयाच्चिरायुर्धनवान्सुखी १ सिंहलग्ने यदा जन्म शुक्रस्त्वयदि पश्यति चसुहीनः सवक्तव्यः शंकरो यदि रक्षति

ल० ॥२॥ सूर्यचंद्रौ च युगपद्द्वादशे यदि संस्थितौ अंधप्रसूतं कुरुतः पापः षष्ठे यवामतौ ३ त्रिषु त्रिषूच्चगेहेषु कन्याराशेः स्थिते रवौ पूर्वादिषु

चं० नकर्तव्यं द्वारं चैव यथाक्रमं ४ अग्रतो हरते चायुः पृष्ठतो हरते धनं वामदक्षिणतो वस्तः सर्वकार्येषु सिद्धिदः ५ उच्चस्थे वाथ नीचस्थे

२५ सप्तमस्थे यदा रवौ पानहीनो भवेद्बालो ह्याजाक्षीरेण वर्धते ६ तिथिः शरीरं देवस्य तिथिं नक्षत्रमाश्रितं तस्मात्तिथिं प्रशंसंति नक्षत्रं

न तिथिं विना ७ मीनांते वृश्चिकांते वै वृषे जूके च मध्यगे यावत्तिष्ठेद्गुरुः सौरिस्तावद्दुर्भिक्षमादिशेत् ८ अथ चंद्रारिष्टशांतिः ॥

घृतकलशं सितवस्त्रयुगं सितवृषभं रजतं च सुवर्णं संप्रदद्याच्चंद्रारिष्टे विप्रायारिष्टशमनाय ९ शुक्लाक्षतैः पूरयित्वा पात्रं वेणुमयं नवं

तस्योपरि पयः पूर्णं रूप्यगर्भं च कांस्यजं १० शुक्लपुष्पैश्च गंधैश्च शुभ्रवस्त्रसमायुतं दद्याज्ज्योतिर्विदे तच्च चंद्रारिष्टप्रशांतये ११ ग

दिता दक्षिणा चान्नमौक्तिकं शंखसंयुतं घृतदीपं च तु वर्तिं चंद्रमुद्दिश्य दापयेत् १२ मधोः सितादौ प्रतिपद्दिनाधे वारस्तु राजा करणा

धिपो जे सस्याधिपः कर्किणि रौद्रधिष्ण्ये मेघाधिनाथो रसपस्तुलाभे १३ धान्याधिपो धन्विनि नक्रराशौ स्याद्धातुरत्नादितरेतरः स्यात्

१४ अथ स्त्रीजातकम् ० वैधव्यं निधने चिंत्यं शरीरं जन्मलग्नभात् सप्तमे पतिसौभाग्यं पंचमे प्रसवस्तथा १५ लग्नेंद्वोः समभे जाता स्वाचि

ताचारशीलभाक् ओजभे पुरुषाकारा दुःशीला दुःखिता वधूः १६ कन्यालग्ने युते दृष्टे शुभैः सच्छीलभूषणा दुःशीला निर्गुणा पापै रा०

र्लग्नेन्द्वोर्युतदृष्टयोः १७ कन्यालिवृषसिंहेषु शशांके ल्पसुता वधूः मूर्तौ राहुर्के भौमे पुरंडा भवति कामिनी १८ वैधव्यं चाष्टमे क्रू २५

रे शुभदृष्टिविवर्जिते यस्यांशे निधनाधीशस्तद्दशायां विनिर्दिशेत् १९ प्रवासी चरभे द्यूने स्वगृहस्थः स्थिरे पतिः द्व्यंगे स्थिरः प्रवासी

च क्लीबोस्ते बुधमंदयोः २० शुभैर्दृष्टे विमले द्यूनभे ग्रहवर्जिते जाताया इह कन्यायाः भवेत्कापुरुषः पतिः २१ द्यूने शुक्रे गृहे शे वा सुरूपः

ल० सुभगः पतिः क्रोधनेनिपुणोविद्वांश्चंद्रेकामातुरोमृदुः २२ इनेतिकर्मकृत्तीक्ष्णोगुणीजीवेजितेंद्रियः स्त्रीलोलकर्मकृत्सौजेमांदे
चं० मूर्खोजरन्नपि २३ भद्रातिथिर्यदाश्लेषाकृत्तिकाशततारका रविमंदारवारेश्च द्विपकन्याबुधैःस्मृता २४ तन्नादिभवर्जंचान्य
२६ द्गृहोत्थंचिंतयेत्सुधीः केचिन्मतेस्त्रीनरयोस्तुल्यंजन्मफलंवदेत् २५ ॥ अथस्फुटश्लोकाः ॥ दशमस्थोयदाराहुर्जन्मकालेस्थि
तोभवेत् षोडशाब्देभवेन्मृत्युर्जातकस्यनसंशयः १ लग्नेभृगुःकेंद्रगतश्चजीवश्छिद्रे चनपापाःपरमायु १२०रत्र ॥ शुद्धेष्टमेकर्क
टलग्नसंस्थोशशांकजीवोगुरुभार्गवौवा २ जायास्थानेस्त्रपानाथःसुतस्थानेबृहस्पतिः कर्मभावेभवेच्छुक्रोराजयोगोभिधीयते
३ त्रयोग्रहायदैकत्रलग्नराशिविवर्जिते कृत्वापुण्यसहस्राणिम्रियतेजाह्नवीजले ४ जन्मपत्रफलंश्रुत्वादैवज्ञंपूजयेन्नृपः से
व्याश्ववस्त्रद्रव्यान्नैस्त्रिवर्गफलसिद्धये ५ ॥ ३० ॥ ॥इतिलग्नचन्द्रिकायांसंगृहीताग्रन्थान्तरश्लोकाः ॥ समाप्तश्चायंग्रन्थः ॥

॥ वाराणसीप्रसादस्यनियोगेनप्रयत्नतः ॥ काशीसंस्कृतमुद्रायामङ्कितोयंशिलाक्षरैः ॥ १ ॥ श्रीकाशीजीमेज्ञानवापीकेपूर्व
फाटकपर श्रीविश्वनाथजीकेपास महाराजशिवलालदुबेजीकेमकानमे काशीसंस्कृतमुद्रायंत्रमे छपी जिनकोलेनाहोय ग०
उनको इसकार्यकेसंपादक श्रीबाबूवाराणसीप्रसादजीकेपास चाकचौरीगलीमेभाईप्रतापसिंहजीकेदुकानपरमिलेगी ॥ २६
॥ ॥श्रीरस्तुशुभंभूयात्॥ ॥ संवत् १९३५ ॥ ॥शाके १८०० ॥ ॥ पौषकृष्णा १० ॥ ॥ [illegible] ॥ ॥श्रीरस्तु॥ ॥

॥ इतिलग्नचंद्रिकासमाप्तम् ॥